
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र. M-2326 विषय ____________

नांव नैषधीयचरीते महाकाव्ये द्वितीय सर्ग (MSS)

लेखक / लिपीकार काशीनाथ खांडेकर

पृष्ठ 23 काळ शके 1794 पूर्ण / अपूर्ण

॥ अथनैषधीयचरितेमहाकाव्येद्वितीयसर्गप्रारंभः ॥

श्रीगणेशायनमः श्रीगुरुचरणारविंदाभ्यांनमः हंससुखेन काव्यनायिका भूताया दमयंत्या वर्णनमारिप्सुः संप्रतिपूर्वसर्गेण सहैकवाक्यतार्थं राज्ञापरित्यक्त
सस्य [illegible]र्षातिशयमाह अधिगत्येति अथानंतरंसद्विजःपक्षीहंसः ततस्तस्मात्पुरुषेषूत्तमात् पुरुषश्रेष्ठात् जगत्याः पृथिव्याअधीश्वरात् प्रणताशेषसामंतलक्षण
पात् नलात्मुक्तिंमोचनंअधिगत्यप्राप्य तंआनंदंलोकोत्तरं हर्षंअविंदत प्राप्तवान् तंकं यआनंदो वचसामपि वाचामपिनगोचरः नविषयः वाक्यैरपि वक्तुमशक्य
र्थः अपिशब्दात् मनसापि निर्णेतुमशक्यः अथच अन्योऽपि द्विजोब्राह्मणोजगतीनांभुवनानां अधीश्वरात्परमेश्वरात्पुरुषोत्तमात् नारायणात्तत्प्रसादादित्य
मुक्तिंआत्यंतिकदुःखनिवृत्तिंमोक्षसाधनं तत्वज्ञानंवाअधिगत्य प्राप्य वचसामगोचरं आनंदंनित्यंनिरतिशयसुखलक्षणंब्रह्मप्राप्नोति यतोवाचोनिवर्तंत

अधिगत्यजगत्यधीश्वरादथमुक्तिंपुरुषोत्तमात्ततः वचसामपिगोचरोनयःसतमानंदमविंदतद्विजः १ अधु
नीतखगःसनैकधातनुमुत्फुल्लतनूरुहीकृताम् करयंत्रणदंतुरांतरे व्यलिखच्चंचुपुटेनपक्षती २ छ

[illegible]विज्ञानमानंदंब्रह्मेति आनंदोब्रह्मणोरूपंतच्चमोक्षेप्रतिष्ठितमितिचश्रुतिः जगती जगतीच्छंदोविशेषेपि क्षितावपीति राजात्तुप्रणताशेषसामंतः
इति दंतविप्रांडजा द्विजा इतिचामरः मुक्तिर्मोचनमोक्षयोरिति हेमचंद्रः अस्मिन्सर्गेसुंदरीछंदः अयुजोर्यदि सौ लगौ लगौ समयोःस्भौ रलग
लक्षणात् १ अस्य गात्रकंपनादिकमप्याह अधुनीतेति सखगोहंसः नैकधा बहुवार उत्फुल्लानि विकसितानि तनूरुहाणि रोमाणि यस्यांसा
रुहा उत्फुल्लतनूरुहाकृतातांतनुंशरीरमधुनीत कंपयामास तथा चंचुपुटेनपुटीकृतया त्रोट्याकराभ्यांनलस्य हस्ताभ्यांयत् यंत्रणंधारणेनियमनंत
[illegible]नंअंतरमध्ययोस्ताहशी पक्षती पक्षमूले व्यलिखत् परिष्कृतवान् पक्षमूलयोरुन्नतानतानि रोमाणि यथास्थानं न्यवेशयदित्यर्थः पक्षि

[illegible]

सन् स्वामिनं गुणेन सकौतुकं करोति महीभुज इत्यस्य भुजंङ्गेनेन कुतूहलमिश्रेनेन चान्वयः भुजो बाहौ च पाणौ चेति विश्वः ॥७॥ अथहं सोवत्कुमारभेते नृपेति
मानसं मानसाख्यं सरोयेन तादृशः सहंसः कुतुकं कुतूहलमेवामृतं सुधा तस्य ऊर्मिषु तरङ्गेषु निमज्जन् निमग्नो भवत् नृपमानसं न लीनः करणं अवलंबिते आश्रिते
र्णशष्कुल्यावेव कर्णविवरे रेव कलस्यायेन तादृशं रचयन् कुर्वन्सन् स्वचचन श्रवणोत्सुकं कुर्वन्नित्यर्थः अवोचत उक्तवान् अन्योपि जलतरंगेषु निमज्जते जनाय अव
नार्थं कलसीद्वयं ददाति मानसं सरसिस्यां तद्गतिमेदिनी अमृतं यत्तद्दशेषस्यान् पियूषेसलिले घृतद्गतिविश्वः कलसीकमिति केचेति ह्रस्वनिषेधः अवोचतेति
छुड् ८ किमवोचेत्याह मृगयेति धर्मागमा धर्मशास्त्राणि स्मृत्यादीनि तेषां यत् मर्म रहस्यं तस्य पारगैः पारगामिभिरपि नृपै राजभिर्मृगया मृगादिमारण

नृपमानसमिष्टमानसः स निमज्जत्कुतुकामृतोर्मिषु अवलंबितकर्णशष्कुलीकलसीकं रचयन्नवोचत ८ मृ
गयानविगीयते नृपैरपि धर्मागमममर्मपारगैः स्मरसुंदर मां यदत्यजः स्तवधर्मः सदयोदयोज्ज्वलः ९ छ

क्रिया न विगीयते न निंद्यते प्रत्युत तैः क्रियत इत्यर्थः हे स्मरसुंदर कामवन्मनोहर हे सुंदर त्वं स्मर विचारये त्विया मां यत् अत्यजः त्यक्तवानसि तव स त्या
गः धर्मः नतु विधेया ननुष्ठानजन्यं पापं किंभूतो धर्मः दयाया उदयेन उत्सहा उज्ज्वलः शोभमानः ९ मृगया कथं न विगीयत इत्याह अवलेति झषान् मत्स्यान्
खगान् पक्षिणः मृगान् हरिणादीन् घ्नतां मारयतां भृभृतां राज्ञां मृगया अघाय पापाय न भवति एतेषां मारणजन्यं पापं राज्ञां न भवतीत्यर्थः कथं न भ
वतीति त्रयाणां विशेषणेनापराधमाह किंभूतान् झषान् अबलं असमर्थं यत् स्वकुलं निजवंशस्तत् अश्नंति भुंजंत इत्ये वंशीलास्तान् खगान् किंभू
तान् निजाः स्वीयाये नीडद्रुमा वासस्थानं वृक्षास्तान् पीडयंतीत्ये वंशीलास्तान् मृगान् किंभूतान् अनवद्यानि अनिंदनीयानि अनपराधकारिणी
त्यर्थः यानि तृणानि कुशादीनि तान्यर्दयंति पीडयंतीत्ये वंशीलास्तान् दुष्टनिग्रहो हि राज्ञां धर्मः अतोपराधकारिणामेतेषां मारणे

कलसीकुंभविरोषः ५

राज्ञामधर्म्येन भवतीति भावः रघुरोमा झषो मत्स्यश्चमरः १० धिगस्तु तृष्णात्यादिना यदनुचितमुक्तं तदपहारायय स्तुं प्रस्तौति यदिति हे राजन् अहं तव
यत् अप्रियं निंद्या अवादिषं उक्तवानस्मि प्रियं इष्टं आधाय कृत्वा तत् अप्रियं नुनुत्सुरस्मि इदानीं निराकर्तुमिच्छुर्भवामि अत्रोपमिनोति अंशुमानिव सूर्यो यथा
तरोर्वृक्षस्य कृतं स्वयमुत्पादितं आतपेन संज्वरं सम्यक् पीडां अमृतं जलं अभिवृष्य अभितो वर्षयित्वा नुदति तथेत्यर्थः अनेनोपमालंकारेण अति
शयितं तव प्रियं करिष्यामीति ध्वन्यते आदित्याज्जायते वृष्टिरिति मनुः पयः कीलालममृतमित्यमरः ११ उपनम्रमिति उपनम्रं उपस्थितं अयाचि

अबलस्वकुलाशिनो झषान्निजनीडद्रुमपीडिनः खगान् अनवद्यतृणार्दिनो मृगान्मृगयाघाय न भू
भृतां घ्नतां १० यदवादिषमप्रियं तव प्रियमाधाय नुनुत्सुरस्मि तत् कृतमातपसंज्वरं तरोरभिवृष्यामृ
तमंशुमानिव ११ उपनम्रमयाचितं हितं परिहर्तुं न तवापि सांप्रतं करकल्पजनान्तराद्विधेः शुचितः प्राप्तिसहः
प्रतिग्रहः १२ पतगेन मया जगत्पतेरुपकृत्यै तव किं प्रभूयते इति वेद्मि न तु त्यजंति मां तदपि प्रत्युपकर्तुमर्त
यः १३

तं अप्रार्थितं हितं प्रियं परिहर्तुं उपेक्षितुं तवापि सार्वभौमस्यापि न सांप्रतं न युक्तं हि यतः करकल्पं हस्तादीषन्न्यूने जनान्तरं मल्लक्षणं न्योजनो
यस्य तादृशात् शुचितः शुद्धात् अनुकूलादित्यर्थः विधेर्दैवात् स प्रतिग्रहः प्राप्तिसहः प्राप्तः सर्वं हि शुभाशुभं दैवात् प्राप्यते न तु इतरस्मा
त् अतो मया यत्कर्तव्यं तत् विधिनैव कृतमिति ज्ञात्वा त्वया नोपेक्षणीयमिति भावः प्राप्तिसहः कालप्रसयात् स प्रतिग्रहः पूर्वमेव विधिना
भ्यं दत्त इति सूचितं १२ निजौद्धत्यं परिहरति पतगेनेति पतगेन पक्षिणा मया जगत्पतेर्भुवनेश्वरस्य तव उपकृत्यै उपकारं कर्तुं किं प्रभूयते

किं समर्थेन भूयते अपि तु नैवेत्यर्थः इत्यहं वेद्मि जानामि तदपि तथापि प्रत्युपकर्तुं प्रत्युपकारार्थं अर्तयः कथमस्योपकारिणः प्रत्युपकारो म
न कर्तव्य इत्येवंरूपाः पीडा मां न तु नैव सजंति पीडा एव मां प्रेरयंतीत्यर्थः १३ तर्हि किं त्वया पक्षिणा राज्ञो मम प्रत्युपकारो न कर्तव्य इत्याशंक्या
चिरादिति अथवा पक्षांतरे उपकर्तुरुपकारकस्य आत्मौपयिकीं आत्मोपायसाध्यां उपक्रियां प्रत्युपकारं अचिरात् शीघ्रमेव आचरेत् विद
जन इति शेषः प्राणानां सहरगहरं त्वादचिरादित्युक्तं एतेन प्रत्युपकारकरणस्यावश्यभावः सूचितः इत्थं एवं विधो सति सा उपक्रिया पृथुम
हति अस्तु भवतु अथ अथवा अणुरल्पा अस्तु इह इति विशेषे महत्त्वाल्पत्वरूपे विदुषां पंडितानां ग्रहो निर्बंधो न नास्ति आमहर्त्वत्यनुरूपो मया

अचिरादुपकर्तुराचरेदथवात्मौपयिकीमुपक्रियां पृथुरित्थमथाणुरस्तु सा न विशेषे विदुषामिह ग्रहः १४
भवितानविचारचारुचेत्तदपि श्रव्यमिदं मदीरितं खगवागियमित्यतोपि किं न मुदं धास्यति कीरगीरिव १५
सजयत्यरिसार्थसार्थकीकृतनामा किल भीमभूपतिः यमवाप्य विदर्भभूः प्रभुं हसति द्यामपि शक्रभर्तृकां १६

क्रियमाणः प्रत्युपकारस्त्वया अवश्यमेव त्वया कर्तव्य इति भावः १४ निजवचसां श्रवणयोग्यतां प्रतिपादयन्नाह भवितेति मदीरितं मयोक्तं
सत्यमहमुपकारं ते करिष्यामीत्येवंरूपं चेत् यदि विचारे मीमांसायां चाल मनोहरं मीमांसासहमित्यर्थः न भविता न भविष्यति तदपि तथापि इदमग्रे वक्ष्य
माणं मदीरितं श्रव्यं तव श्रवणार्हं भवत्येव कथं विचारासहं वाक्यं श्रवणार्हमित्याशंकायामाह इयं खगवाक् पक्षिवचनं अयं खगोपि मनुष्यवत् कीय
र्थः इत्यतोपि इत्यस्माद्धेतोरपि कीरगीरिव शुकवाक्यमिव मम वाक्यं किं मुदं तव हर्षं न धास्यति न जनयिष्यति अपि तु धास्यत्येव इष्टसाधकत्वात् इष्टसा
धनत्वान् जन्या हि जनानां प्रवृत्तिरतो हर्षलक्षणस्येष्टस्य जनकत्वात् मम वचसि तव श्रवणप्रवृत्तिर्भविष्यत्येवेति भावः १५ तदेवाह स इति किल प्रसिद्धो-

अरिसार्थेषु शत्रुसमूहेषु सार्थकीकृतं विभ्यद्यस्मात्स्वयं चरति अन्वर्थीकृतं नाम संज्ञा यस्य ताद्दृशः सभीमभूपतिर्भीमनामाभूपालः जयति सर्वोत्कर्षेणवर्त्तते स कः विदर्भभू
विदर्भभूमिः यं प्रभुं स्वामिनं अवाप्य प्राप्य शक्रभर्तृकामपि इंद्रपतिकामपि द्यां अमरावतीं हसंतिव सदृशीभवतीत्यर्थः शक्यते जेतुमिति शक्रः सद्भूत्वकाद्यौः अहं तु भीम
भर्तृके सुपहासबीजं शंकेत तपस्विभ्योऽपीति शक्र इति प्राचः केचित्तु शक्नोतिशत्रून् जेतुमिति व्युत्पत्त्या शक्र इति इन्द्रस्य नाम न सार्थकं युद्धात् कदाचि
त् पलायनश्रवणादित्याहुः १६ दमनादिति सभीमभूपतिः अमनाक् अत्यर्थं प्रसेदुषः प्रसन्नात् तथ्यगिरः सत्यवचनात् दमनात् दमननाम्नः
स्तपोधनात् मुनेः तनयां कन्यारूपं वरं अभिष्टं आप प्राप्तवान् किंभूतां तनयां दिष्टः कालः पिष्टपं जगत् अनयोस्त्रितयं भूतभविष्यव

दमनादमनाक् प्रसदुषस्तनयां तथ्यगिरस्तपोधनात् वरमाप सदिष्टपिष्टपत्रितयानन्यसदृग्गुणोदयाम् १७
भुवनत्रयसुभ्रुवामसौ दमयंतीकमनीयतामदम् उदियाय यतस्तनुश्रिया दमयंतीति ततोऽभिधां दधौ १८

र्तमानरूपे स्वर्गमर्त्यपातालरूपे च नास्ति अन्यः सदृक् समानो यस्य ताद्दृक् गुणोदयो यस्यास्ताद्दृशीं लोकत्रये कालत्रये च ताद्दृशसौंदर्या दिगुणवती
कापि नासीत्यर्थः यद्वा दिष्टो दमनमुनिना आदिष्टो दत्त इति यावत् पिष्टपत्रितये लोकत्रये अनन्यसदृक् गुणोदयो यस्यै ताद्दृशीं कालोदिष्टोऽप्यनेहापीति
पं भुवनं जगदिति चामरः १७ किमाख्यासेत्याह भुवनेति असौ भीमतनया यतो यस्माद्धेतोः तनुश्रिया देहशोभया भुवनत्रयस्याः सुभ्रुवः सुंदर्यस्तासां कम
या सौंदर्यं गयामदोहंकारस्तं दमयंतीशामयंतीसतीउदियाय उत्पन्ना ततस्तस्मात् दमयंतीति अभिधां यौगिकं नाम दधौ धृतवती दमयंती
रूपजं मदमिति क्वचित्पाठे तत्र किलोत्प्रेक्षायां रूपजं सौंदर्यजातमित्यर्थः १८

नलं विलोभयन् भैमीमुत्कर्षयति श्रियमेवेति हे राजन् त्वं गुणसिंधोर्गुणसमुद्रात् धराधिपात् पृथिवीपते भीमात् उद्भिन्नां उत्पन्नां तां दमयंतीं श्रियमेव लक्ष्मीमेव परं निश्चितं अवेहि जानीहि अन्यापि श्रीः धरां अधिपाति धारणेन रक्षतीति तस्मात् धराधिपात् मंदरपर्वतात् सिंधोरुत्पन्ना परामिति पाठे परां अन्यां श्रियोप्युत्कृष्टमित्यर्थः श्रीः समुद्रादुत्पन्ना इयं तु गुणसमुद्रादित्युत्कर्षः त्वमपि तां जानासीत्याह व्यवधावपि व्यवधाने सत्यपि मृडः शिवस्तस्य या चूडा मौलिः सैव निलय आश्रयो यस्यास्तादृशीं विधोश्चंद्रस्य कलां को वा जनो न वेद न जानाति अपि तु सर्व एव जानातीत्यर्थः यथा शिवस्याप्रत्यक्षत्वेपि अतिप्रसिद्धत्वात् तन्मौलिस्थां चंद्रकलां सर्वे जानंति तथा सत्यपि व्यवधाने त्वमपि अतिप्रसिद्धां तां जानासीति भावः १९ इत्थं सामान्यतः स्तुत्वा प्रत्यंगमस्या वर्णयति चिकुरेति

श्रियमेव परं धराधिपाद्गुणसिंधोरुदितामवेहि तां व्यवधावपि वा विधोः कलां मृडचूडानिलयां न वेद कः १९ चिकुरप्रकरा जयंति ते विदुषी मूर्धनि सा बिभर्ति यान् पशुनाप्यपुरस्कृतेन तत्तुलनामिच्छतु चामरेण कः २० स्वदृशोर्जनयंति सांत्वनां खुरकंडूयनकैतवान्मृगाः जितयोरुदयत्प्रमीलयोस्तदखर्वेक्षणशोभया भयात् २१ हे राजन् ते चिकुरप्रकराः केशसमूहा जयंति सर्वोत्कृष्टतया वर्तंते के ते यान् चिकुरप्रकरान् विदुषी पंडिता सा दमयंती मूर्द्धनि शिरसि आबिभर्त्ति धारयति अथ च आभरणं करोति ननु चामरेण साम्ये सति कथमेषां सर्वोत्कृष्टत्वमत आह पशुनापि चमरीसंज्ञकमृगेणापि अथ च मूर्खेणापि अपुरस्कृतेन पश्चात्कृतेन अथ च अपूजितेन चामरेण तत्तुलनां तेषां केशानां तुलनां साम्यं को जन इच्छतु अभिलषतु न कोपीत्यर्थः अयं भावः ये पंडितया मस्तके आभरणीक्रियंते तेषां मूर्खेणापि अपूजितेन वस्तुना सह साम्यं काभिलषतीति एतेन चामरापेक्षयापि भैम्याः केशानां सौष्ठवाधिक्यं ध्वनितं २० स्वदृशोरिति हे राजन् मृगा हरिणाः खुरेण यत्कंडूयनं तस्य कैतवान् छ

लान् तस्या दमयंत्याअखर्वेदीर्घे येईक्षणेनयने तयोः शोभयासौंदर्येण जितयोः पराभूतयोः अतएव भयात् त्रासादिव उदयंती जायमानाप्रमीला मुद्रणं ययोस्ता
स्ताहशयोः स्वदृशोर्निजचक्षुषोः सांत्वनांसमाश्वासंजनयंतिकुर्वंति भयादिवेति प्रतीयमानोत्प्रेक्षा योहि येनपराजीयते तस्यतस्माद्भयेनप्रमीलाजायते अन्यो
पि तथाविधंभीतं करेणसांत्वयतीति तथोत्प्रेक्षितंएनेन मृगनयनापेक्षया तस्यानयने अतिसुंदरे इतिध्वनितं खर्वोह्रस्वश्चवामनइत्यमरः २१ अपीति हे ध
रापते महीपाल दमस्वसुर्दमयंत्या लोकयुगमपि मातृकुलपितृकुललक्षणमपिश्रुतिगामितया लोकाकर्णनविषयतयी वेदार्थानुगंतृतया वासुतरामतितरां व्यति-
भाते परस्परंशोभते तथा तस्याहशावपि लोचने अपिश्रुतिगामितयाकर्णांतविश्रांततयासुतरांव्यतिभाते परस्परंशोभेते एवंतस्याःश्रुत दृष्टा आदौश्रुताः पश्चा

अपिलोकयुगंदृशावपिश्रुतदृष्टारमणीगुणाअपि श्रुतिगामितयादमस्वसुर्व्यतिभातेसुतरांधरापते २२
नलिनंमलिनंविवृण्वती पृषतीमस्पृशतीतदीक्षणे अपिखंजनमंजनांचितेविदधातेरुचिगर्वदुर्विधं २३

त्दृष्टाश्च रमणीगुणाअपि सौंदर्यादयः स्त्रीगुणा अपिश्रुताः पुराणादौ दृष्टाः कासुचित् सुंदरीष्विति केचित् श्रुतिगामितयासर्वेषांश्रवणविषयतयासुतरांव्यति-
भाते परस्परंशोभंते व्यतिभाते इत्यत्रव्यतिहारे आत्मनेपदंते आते अंते सर्वत्रैव समानरूपत्वाद्वचनश्लेषोयं अत्रनयनवर्णनस्यप्राकरणिकतया प्रस्तुतेनतेनस-
ह अप्रस्तुतयोर्लोकयुगरमणीगुणयोरेकधर्माभिसंबंधाद्दीपकं २२ नलिनमिति हेराजन् नलिनंपद्मं मलिनंहीनप्रभंविवृण्वती कुर्वतीतथापृषतीं हरिणीं अ-
स्पृशती अगणयंती तदीक्षणेतस्यादमयंत्या ईक्षणेचक्षुषीअंजनेन कज्जलेन अंचितेपूजितेसती सांजने इत्यर्थः खंजनमपि खंजरीटमपि रुचौकांत्यां योग
र्वः कज्जलरेखातुल्यरेखायोगादहंकारस्तेन दुर्विधं दरिद्रं रुचिगर्वाभाववंतमित्यर्थः विदधाते कुर्वाते रुचीति समस्यंतं पृथक्पदंवातदीक्षणाभ्यां कमलंहरि

धीनयनंच अक्लेशेनैवजितं खंजनस्यतु कज्जलरेखातुल्यरेखावत्वात् तज्जयः सांजनाभ्यांसद्भ्यां कृतइति भावः यद्वा विभ्रमवती आत्मानं प्रकाशयंती पृषतीं अंजन-
शलाकां अस्पृशनी अप्राक्षेसती तदीक्षणेन मलिनं पद्मं मलिनं विदधाने खंजनमपि अंजनांचिते सती रुचिगर्वदुर्विधं विदधाते इत्यन्वयः एतत्पक्षे विभ्रमवतो इत्यनेन अ-
वतंसीकृतंकमलं कटाक्षावलोकनेन प्रसृतया कांत्याजितमिति भावः खंजरीटस्तु खंजन इत्यमरः हरिण्यां पृषती प्रोक्ता शलाका कज्जलस्य चेति रंति देवः २३
अधरमिति हे राजन् खलूत्प्रेक्षायां अस्यादमयंत्याः रदनच्छदे दशनवाससी वदत् अभिदधत् अधरबिंबइति अदःपदं एतत् पदं इति भव्यं समीचीनं अन्वयं सं-
बंधं लभते प्राप्नोति इति किंबिंबनामकं फलं आभ्यां रदनच्छदाभ्यां अधरहीनं बिंबापेक्षया एतयोरतिरक्तत्वाद्भूनवदास्वाद्यत्वाच्च तथाहि अधरं बिंबं याभ्यामि-
ति पंचम्यन्यपदार्थे बहुव्रीहिर्नतु अधरो बिंबमिवेति व्याघ्रादिभिस्तद्गुणस्तुत्यस्येत्यनेन कर्मधारयः अधरबिंबेति विभक्तिरहितो भाग इति शब्देनाकृष्टः इति मस्त्वं

अधरं खलु बिंबनामकं फलमाभ्यामिति भव्यमन्वयं लभते ऽधरबिंब इत्यदः पदमस्या रदनच्छदे वदत् २४

पदत्वमिति मतेनास्य पदत्वं संध्यभावस्तु एकपदादिभ्योन्यत्र संधेर्विभाषितत्वस्य सर्वसंमतत्वेनेच्छाधीनत्वात् यद्यपि ओष्ठाधरौ तु रदनच्छदौ दशनवाससी इत्य-
मरकोषादौ रदनच्छदशब्दस्य पुंस्त्वं दृश्यते तथापि लिंगमशास्यं लोकाश्रयत्वादित्यतः क्लीबत्वं वस्तुतस्तु अस्मादित्यत्र आभ्यामिति अधरबिंबमित्यद इत्यत्र अधर-
बिंब इत्यद इति रदनच्छदमित्यत्र च रदनच्छदे इति पाठो लिपिकरप्रमादाज्ज्ञानः संगतत्वात् तथाहि अधरो बिंबमिवेति कर्मधारये अधरं बिंबं यस्मादधरो-
ष्ठादिति बहुव्रीहौ च समानमेव अधरबिंबमिति पदं बहुव्रीहौ समासेतस्याधरोष्ठस्य विशेषणतया कर्मधारये तस्य पदलिंगतया च क्लीबत्वं अन्यथा लिंगव-
चनभेदेन पदभिन्नत्वात् कवेरभिप्रायो नोपपद्येतेति अधरस्तु पुमानोष्ठे हीने ऽनूर्ध्वे च वाच्यवदिति मेदिनी २४ ꣸ ꣸ ꣸ ꣸

हृतेति इंदुमंडलंचंद्रबिंबं वेधसाविधात्रादमयंतीवदनाय भैमीमुखंनिर्मातुंहृतः सारः श्रेष्ठभागोयस्य तादृशमिव अतएवकृतं विधात्रा जनितं मध्ये बिलं गर्तो य
स्यतादृशं बिलोक्यते दृश्यते संभाव्यतइत्यर्थः किंभूतंधृतोगंभीररवन्यां निम्नगर्तेरवस्याकाशस्य नीलिमाश्यामत्वं येन वा दृशंबृह द्गर्तोहि दूरतः श्यामवद्भाति चंद्र
मंडलेनायंकलंकः किंतुगृहीत सारत्वादुत्पन्नेगंभीरगर्ते आकाश कालिमेतिभावः यद्यप्याकाशस्य नीरूपत्वान्नीलिमा नसंभवति तथापि गंभीरगर्तस्यालोकसं
पर्काभावादालोकाभाव लक्षणांधकार पर्यवसन्ननीलवत्त्वं तदवच्छिन्नाकाशे उपचर्यतेमालिन्यंव्योम्नि पापे इत्याद्युक्तकविसमयख्यातत्वाद्वा तथोक्तंवदनायेति
तुङ्गर्भात् कर्मणइतिचतुर्थी २५ प्रकारांतरेणापि दमयंतीवदनस्यचंद्राधिक्यमाह धृतेति विधिर्ब्रह्मा विदर्भजाया दमयंत्या आननस्यमुखस्य नीराजनं

हृतसारमिवेंदुमंडलंदमयंतीवदनायवेधसा कृतमध्यबिलंविलोक्यते धृतगंभीरखनीखनीलिम २५
धृतलांछनगोमयांचलं विधुमालेपनपांडुरंविधिः भ्रमयत्युचितंविदर्भजाननतीराजनवर्धमानकं २६
सुषमाविषयेपरीक्षणेनिखिलंपद्मभाजितंमुखात् अधुनापिनभंगलक्षणंसलिलोन्मज्जनमुज्झतिस्फुट २७

निर्मंछनासाधनं वर्धमानकंशरावमिव विधुंचंद्रंउचितं योग्यंयथास्यात्तथाभ्रमयति किंभूतंविधुं धृतंलांछनमेव कलंकएव गोमयांचलं गोमयांशोयेन तादृशं गोम
यांचनमिति क्वचित्पाठः तत्रधृतं लांछनंगोमयमिवेति तेन अंचनंपूजनं यस्येति विग्रहः तथा आलेपनंपिष्टोदकं आलिपणाइति लोकप्रसिद्धंतेनेव पांडरंशुभ्रं शा
रावमपि गोमययुक्तं पिष्टोदकेनालिप्तंच कृत्वा उपरि परिभ्राम्य दृष्टिदोषनिवारणार्थंनीराजनाक्रियतइति लोकाचारः अधमेनोत्तमस्य नीराजनाक्रियत इत्योचि- ६
त्यं शरावो वर्द्धमानकइत्यमरः २६ सुषमेति स्फुटमुत्प्रेक्षे सुषमाविषये परमशोभाविषये अधिका शोभापद्मानां दमयंतीमुखस्य वेत्येवंरूपे परीक्षणं प

रीक्षायां दिव्येन शुद्धा विस्यर्थः निखिलं समस्तं पद्मं तन्मुखात् भैमीमुखात् अभाजि स्वयमेव पराजितं कृत एवं त्वया ज्ञातमित्याह अधुनापि इदानीमपि भंगल-
क्षणं पराजयचिन्हं सलिलोन्मज्जनं जलादुत्थानं न उज्झति न त्यजति पद्ममित्यनुषज्यते पद्मस्य स्वाभाविकमपि जलोन्मज्जनं भंगलक्षणत्वेनोत्प्रेक्षितं तज्ज
लदिव्ये हि तोरणस्थ पुरुषमुक्तं शरमादाय अन्यो वेगवान् जनस्तत्रागत्य यदि दिव्यकारिणं निमज्जन्तं पश्यति तदा तस्य शुद्धिर्भवति यद्युन्मज्जति तदा पराजयो भवति यदाह याज्ञवल्क्यः समकालमिषुमुक्तमानीयान्यो जवी नरः गते तस्मिन्निमग्नांगं पश्येच्चेच्छुद्धिमाप्नुयादिति तन्मुखादिति पराजेः सोढुमशक्यमिति सूत्रे पराजयार्थकधातोर्ग्रहणादपादाने पंचमी सुषमा परमा शोभेत्यमरः २७ धनुषीइति नद्भ्रुवौ दमयंतीभ्रुवौ रतिपंचबाणयोः रतिकामदेव-

धनुषी रतिपंचबाणयोरुदिते विश्वजयाय तद्भ्रुवौ नलिके न तदुच्चनासिके त्वयि नालीकविमुक्तिकामयोः २८
सदृशी तव शूर सा परं जलदुर्गस्थमृणालजिद्भुजा अपि मित्रजुषां सरोरुहां स्पृहयालुः करलीलया श्रियः २९

योर्धनुषी विश्वजयाय त्रिभुवनजयार्थं उदिते प्रादुर्भूते तद्भ्रुवौ दृष्ट्वा सर्वेऽपि कामवशा भवंतीति भावः तथा तस्या भैम्या उच्चनासिके त्वयि नालीकस्य शर
स्य विमुक्तौ परित्यागे कामोऽभिलाषो ययोस्ते तादृशयो रतिपंचबाणयोर्नलिके न शराधारनलौ न अपितु नलिके एवेति काकुः त्वयि नालीकेत्यादिना सा तवैव प्रिया भ
विष्यतीति सूचितं नलिक इति नलावेव नलिके स्वार्थे कः क्वचित् स्वार्थिकप्रत्ययां तालिंगवचनान्यतिक्रम्य वर्तत इति स्त्रीत्वं नालीको ऽगे शरे शल्ये नालीकं प
द्मवंधन इति हेमचंद्रः २८ सदृशीति हे शूर हे वीर सा दमयंती परं केवलं तव सदृशी योग्या अथ च तुल्या किंभूता जलमेव दुर्गं दुर्गमस्थानं तत्रातिष्ठंतीति तथावि
धानि मृणालानि बिसानि जयत इति तादृशौ भुजौ यस्यास्तादृशी मृणालादपि सरलौ कोमलौ च तस्या भुजावित्यर्थः तथा करलीलया हस्तविलासेन मित्र

नैषध १

षां सूर्यप्रणयिनां सूर्योदयात् प्रफुल्लानामित्यर्थः सरोरुहां पद्मानां श्रियः शोभाः स्पृहयालुर्ग्रहीतुकामा त्वमपि जलदुर्गस्थशत्रुजिद्भुजः मित्रजुषां सुहृत्सहायाना सर्ग
मपि शत्रूणां करलीलया बलिक्रियया श्रियः संपत्तीः स्पृहयालुः शूरेति संबोधनात् सापि ईदृशत्वात् शूरा अतस्त्वैव योग्येति भावः मित्रं तु सख्यौ मित्रो दिवा २
करइति हेमचंद्रः बलिहस्तांशवः करा इति लीलाविलासक्रिययोरिति चामरः २९ वयसी इति विधिना विधात्रा रोमसरेखया रोमावल्या प्रविभज्य समविभागं-
कृत्वा कृतसीम्नि कृतमर्यादायामपि सुदृशि सुलोचनायां दमयंत्यां स्वाभिविधिं निजाभिव्याप्तिं विधित्सुनी कर्तुकामे शिशुता शैशवं तदुत्तरं यौवनं सा च तच्च ते द्वे व
यसी न रज्यतः न तुष्यतः सीमाविवादं न त्यजत इत्यर्थः उभयोरपि तस्यामेकाकित्वेन स्थातुमभिलाषात् अन्यावपि मध्यस्थेन विभज्य सेत्वादिना कृतमर्या

वयसी शिशुता तदुत्तरे सुदृशि स्वाभिविधिं विधित्सुनी विधिनापि न रोमसरेखया कृतसीम्नि प्रविभज्य रज्यतः ३०
अपि तद्वपुषि प्रसर्पतोर्गमिते कांतिझरैरगाधतां स्मरयौवनयोः खलु द्वयोः प्लवकुंभौ भवतः कुचावुभौ ३१

दायामपि भूमौ विवदेते एतेन वयःसंधौ वर्तमाना सा विवाहयोग्येति सूचितं अत्र विधिनापीत्यत्रापि शब्दः कृतसीम्नीत्यनेनान्वेति ३० अपीति खलूत्प्रे-
क्षे कांतय एव झराः प्रवाहास्तैरगाधतां अतलस्पर्शतां गमिते ऽपि प्रापिते ऽपि तस्या दमयंत्या वपुषि शरीरे प्रसर्पतोः संचरतोर्द्वयोरुभयोः स्मरयौवनयोः काम-
तारुण्ययोः उभौ द्वौ कुचौ स्तनौ प्लवकुंभौ संतरणघटौ उडुपरूपकुंभौ वा भवतः अत्रापि शब्दस्य गमित इत्यनेनान्वयः पूर्वापेक्षया समुच्चय इति केचित् अगा ७
धजले हि संतरणमनुचितं तत्रापि यदि क्रियते तदा कुंभं गृहीत्वैवेति तथोत्प्रेक्षितं अगाधमतलस्पर्शमिति प्रवाहे निर्झरो झर इति चामरः ३१ छ. छ

कलशइति निजस्यस्वस्य हेतुर्निमित्तकारणं योदंडस्तस्माज्जायतइति ताहृशोयश्चक्रभ्रमिकारितागुणः चक्रस्यकुंभकारद्रव्यविशेषस्यभ्रमिकारिताभ्रमण
जनकत्वरूपोधर्मः कलशेघटे किमु अस्तीतिशेषः ननुसमवायिकारणगुणानामेवकार्यगुणारंभकत्वंनतुनिमित्तकारणगुणानामतोऽसंभाव्यमेवैतदित्ति कथ-
मेताहृग्वितर्कइत्याकांक्षायांशब्दश्लेषेणोपपादयति यत् यस्मात् तस्यादमयंत्या उच्चकुचो उन्नतस्तनो भवन् सकलशः प्रभाझरेण कांतिसमूहेनचक्रभ्रमिंकु
लालचक्रभ्रमणंआतनोति जनयति अथच चक्रस्य राष्ट्रस्यलोकसमूहस्य वाभ्रमिं भ्रांतिं मोहमितियावत् आतनोति यद्वाप्रभाझरे कांतिप्रवाहेचक्रभ्रमिं च
क्रवाकभ्रांतिं आतनोतिचक्रवाकाहिप्रवाहेतिष्ठंति शब्दच्छलादेवायं वितर्कः चक्रः कोकेपुमान्क्लीबंव्रजेसैन्यरथांगयोः राष्ट्रेदंभांतरे कुंभकारोपकरणा-

कलशेनिजहेतुदंडजः किमुचक्रभ्रमिकारितागुणः सनदुच्चकुचोभवन्प्रभाझरचक्रभ्रमिमातनोतियत् ३२ भजतेखलुषण्मु
खंशिखीचिकुरैर्निर्मितबर्हगर्हणः अपिजंभरिपुंदमस्वसुर्जितकुंभःकुचशोभयेभराट् ३३ उदरंनतमध्यपृष्ठतास्फुरदं
गुष्ठपदेनमुष्टिना चतुरंगुलिमध्यनिर्गतत्रिवलिभ्राजिकृतंदमस्वसुः ३४ स्त्रियोरितिमेदिनी ३१ भजतइति खलुनिश्चयेशिखीम

यूरः दमस्वसुर्दमयंत्याश्चिकुरैः केशैर्निर्मिताकृता बर्हाणांपिच्छानांगर्हणानिरस्कारोयस्य ताहृशः सन् षण्मुखंकार्तिकेयंभजतेसेवते तथा इभराट् ऐरावतो
ऽपिदमस्वसुः कुचशोभयाजितोनिरस्कृतौकुंभौयस्य ताहृशः सन् जंभरिपुइंद्रंभजते मयूरैरावतौ देवताराधनेनबर्हकुंभयोर्भैमीकेशस्तनसाम्यलाभा-
र्थं वैरनिर्यातनार्थं वाकार्तिकेंद्रौ भजेतेइतिभावः अन्योपि केनचित्पराजितो भूत्वातस्यसाम्यलाभार्थंप्रतीकारार्थंवा कंचिन्देवंसेवते अत्रकार्तिकेयस्य-
षण्मुखशब्देनाभिधानात् भयंकरत्वंइंद्रस्यच जंभरिपुशब्देन शत्रुनिवारकत्वंसूचितं ३३ उदरमिति दमस्वसुर्दमयंत्या उदरंमुष्टिनाकृतं विधिनेतिशे

षः किंभूतेन मुष्टिनाऽऽनतं निम्नं मध्यं मध्यभागो यस्य तादृशं पृष्ठं यस्योदरस्य तस्य भावस्तत्ता तया स्फुरत् व्यक्तीभवत् अंगुष्ठपदं अंगुष्ठांगुलिनिवेशस्थानं अंगुष्ठ
चिन्हं वा यस्य तादृशेन उदरं कीदृशं चतसृणामंगुलीनां मध्येन निर्गतानि :सृतानि यानि त्रीणि वलयस्ताभिर्भ्राजते शोभते इति तादृशं पृष्ठमध्यस्य निम्नत्वमंगुष्ठनिवे
शात् उदरस्य च वलित्रयवत्वं अंगुलिचतुष्टयपीडनात् चतसृणां त्रीण्येवांतराणि भवंति अन्यदपि कोमलं वस्तु ऊर्ध्वकृतांगुष्ठमुष्टिना गृहीतं सत् अंगुष्ठनिवे
शेन मध्ये नम्रं चतुरंगुलमध्यनिर्गतवलित्रयवच्च भवति ३४ प्रकारांतरेणाप्युदरं वर्णयति उदरमिति किमु वितर्के कोपि कश्चिज्जनो ब्रह्मैव वा कुतुकी
कौतूहलयुक्तः सन् मुष्टिनाकरणेन दमस्वसुर्दमयंत्या उदरं परिमाति परिमितं करोति यद्यस्मात् सहेमकांचिभिः सुवर्णमेखलासहिताभिर्वलिभिस्तिसृ-

उदरं परिमाति मुष्टिना कुतुकी कोऽपि दमस्वसुः किमु धृततच्चतुरंगुलीवयद्वलिभिर्भाति सहेमकांचिभिः ३५
पृथुवर्तुलतन्नितंबकृन्मिहिरस्यंदनशिल्पशिक्षया विधिरेकचक्रचारिणं किमु निर्मित्सति मान्मथं रथं ३६

भिर्वलिभिः करणैर्धृतास्तस्य परिमातुर्मुष्टेर्वा चतस्त्रोंगुलयो येन तादृशमिव भाति शोभते उदरमित्यर्थात् तिस्रो वलयो हेमकांची च मुष्टेरंगुलिचतुष्टयमि-
त्यर्थः को ब्रह्मात्मापरे वार्थे मारुते वेधसि ब्रध्ने पुंसि कः कं शिरोंबुनोरित्यमरः उदरावयवे द्वे त्स्रे बलिः पूजोपहारयोरिति विश्वः ३५ पृथ्विति किंभूतो
सौ विधिर्ब्रह्मा पृथुः स्थूलो वर्तुलो वृत्तो यस्तस्या दमयंत्या नितंबः कट्याः पश्चाद्भागस्तं करोतीति तादृशः सन् मिहिरस्यंदनस्य सूर्यरथस्य यत् शिल्पं निर्मा
णं तस्य शिक्षया अभ्यासेन एककेनासहायेन चक्रेण चरतीत्येवंशीलं मान्मथं कंदर्पसंबंधिनं रथं निर्मित्सति निर्मातुमिच्छति विधिर्हि पूर्वं एकचक्रचा-
रिणं सूर्यरथं कृतवान् तच्छिक्षया संप्रति किं दमयंतीनितंबरूपं तथाविधं कामरथं कर्तुमिच्छतीति तस्या नितंबः कामरथत्वेनोत्प्रेक्षितः एतेनमैस्यानि ८

तं वीदर्शनमात्रेण काममाविर्भावयतीतिसूचितं मिहिरारुणपूषणइत्यमरः पश्चान्नितंबः स्त्रीकट्याइतिच ३६ तरुमिति उभोराजन् सुंदरीदमयंती
परिणाहिनाविशालेन ऊरुयुगेणऊरुद्वयेन परंकेवलंतरुं वृक्षरूपां रंभांकदलीमेव किंजिष्णुर्जेत्री अपितुतरुणीमपियुवतीमपितांरंभांरंभानाम्नीमप्सर
संजिष्णुः किंभूतांधनदापत्यस्यकुबेरपुत्रस्यनलकूबरस्यतपसः फलंस्तनौयस्यास्ताहृशींतदुपभोग्यत्वात् कदलीस्तंभापेक्षयातस्याऊरूसरलौकोमलौ
चरंभाप्सरोपेक्षयाच्चसासुंदरीतिपर्यवसितोर्थः अत्रजिष्णुरेवेत्येवकारस्यरंभाभित्यनेनान्वयः परिणाहोविशालतेत्यमरः रंभास्यादप्सरोभेदेकदलीत्री
हिभेदयोरितिबलः ३७ जलजेइतियेजलजेपद्मेरविसेवयेवसूर्योपासनयेव एतत्पदतांदमयंतीचरणत्वरूपंपदं उत्तमस्थानंआधिपत्यंवा अवापतुःप्राप-

तरुमूरुयुगेणसुंदरीकिंसुरंभांपरिणाहिनापरं तरुणीमपिजिष्णुरेवतांधनदापत्यतपःफलस्तनीं ३७ जलजेरविसेवयेवयेपदमे
तत्पदतामवापतुः ध्रुवमेत्यरुतःसहंसकीकुरुतस्तेविधिपत्रदंपती ३८ श्रितपुण्यसरःसरित्कथंनसमाधिक्षपिनाखिलक्ष-
पं जलजंगतिमेतुमंजुलांदमयंतीपदनाम्निजन्मनि ३९

तुः रुतःशब्दात् हंसरवतुल्यशिंजितात् ध्रुवमुत्प्रेक्षेशब्दादेवेत्यहमुत्प्रेक्षेइत्यर्थः ते
जलजेकर्मभूतेविधिपत्रदंपतीब्रह्मवाहनहंसजायापतीएत्यआगत्यसहंसकीकुरुतः हंससहितेकुरुतः अथचपादकटकसहितेकुरुतः हंसदंपतीएवपादकटकरू
पेणपरिणताविव्यर्थः सूर्यसेवया पद्मयोर्दमयंतीपदत्वलाभोविधिसेवयाहंसयोश्च एतच्चरणवलयत्वलाभोयुक्तएव अन्योपिकंचिद्देवं आराध्यउत्तमपदं
लभंतेरुतइति उत्प्रेक्षायाहेतुः रुतःशब्दादित्यनुमीयते इत्यपरेरुशब्दे भावेक्विप् यद्वा यतोरुतःशब्दंकुरुतः अतोविधिपत्रदंपतीएवतेसहंसकीकुरुतः
ध्रुवंनिश्चयेहंसकः पादकटकइत्यमरः ३८ श्रितेति जलजंपद्मंदमयंत्याः पदमेवचरणमेवनामयस्यताहृशेजन्मनिमंजुलांसमीचीनांगतिंगमनं अथचद

शांकथंनएतुप्राप्नोतु उचितैवंतत्प्राप्तिरितिकाकुः किंभूतंयतःश्रिताउपजीविता अथच आश्रिताः पुण्याः श्रेयस्कारिण्यः अथच पवित्राःसरःसरितः स
रसीनद्योयेन ताहृशंतथासमाधिना ध्यानेन अथचनिद्रयासुद्रूणेनेत्यर्थः क्षपिता अतिवाहिता अखिलाः समस्ताः क्षपारात्रयोयेन ताहृशं अन्योपि पुण्यस-
रसींपंपादिकांपुण्यनदींगंगादिकांवा उपजीव्यसमाधिना निखिलरजनीरतिवा त्यचउत्तमांगतिंप्राप्नोति अत्रसरःसरितोरुभयोरुपादानेन अखिलेति रात्रि
विशेषणदानेनच पद्मंबहुषुजन्मसु बहुकालंतपस्यांकृत्वा भैमीपदूनामजन्मप्राप्तंनत्वनायासेनेति सूचितं तस्याः पदमतीवमनोज्ञमितिपर्यवसितोर्थः स
माधिर्नियमेध्यानेनिद्रायांचसमर्थन इतिविश्वः गतिःस्त्रीमार्गदशयोर्ज्ञानेयात्राभ्युपाययोरितिमेदिनी ३९ कथंभैमीएताहृशीत्वयाज्ञातेत्याह सरसीरिति

सरसीःपरिशीलितुंमयागमिकर्मीकृतनैकनीवृता अतिथित्वमनायिसाहृशोःसदसत्संशयगोचरोदरी ४० अवधृत्यदिवोपियौ
वतैर्नसहाधीतवतीमिमामहं कतमस्तुविधातुराशयेपतिरस्यावसतीत्यचिंतयं ४१

सरसीः सरांसि बृहत्सरांसिवा परिशीलितुंअवगाहितुं
गमिकर्मीकृतागतानैकाबहवोनीवृतोजनपदायेन ताहृशेनमयासादमयंती हृशोश्चक्षुषोरतिथित्वंगोचरत्वंचक्षुरिंद्रियजन्यज्ञानविषयत्वमित्यर्थः अना
यिप्रापिताहृष्टेत्यर्थः किंभूतासासदसतोः संशयोविद्यमानाविद्यमानकोटिकः संदेहः उदरमस्तिनास्तिवेत्येवंरूपस्तस्यगोचरोविषयः उदरंयस्यास्ताहृ
शीअतिकृशोदरीत्यर्थः एतेननत्वप्रापिताहृशीहृष्टेतिभावः गमिकर्मीकृतेतिगमिर्गमनंअनुकूलनयाउत्तरदेशसंयोगावच्छिन्नोव्यापारस्तस्यकर्मतन्नि
ष्ठधात्वर्थतावच्छेदकरूपफलाधारः अताहृक्ताहृक्कृतइति अभूततद्भावेच्विः केचित्तुगमिर्गमधातुस्तस्यकर्मकारकविशेषइत्याहुस्तन्नवर्णविशेषा ९
त्मकस्यगमधातोः कारकसंबंधाभावात् नचपरंपरयातत्संबंधोस्तीतिवाच्यं तदपेक्षयागमनार्थकत्वकरणस्यैवसम्यक्त्वात् इङ् धातुकथने इतिसूत्रे

भावेपीडोविधानात् सरसीस्यान्महत्सरइतिबलः कासारःसरसीसर इत्यमरः नीवृज्जनपदइतिच ४० श्लोकद्वयेनत्वमेवदमयंतीयोग्यइतिदर्शयति
अवधृत्येति दिवोऽपि स्वर्गस्यापियौवतैर्युवतिसमूहैर्नसहाधीतवतींनसहाध्ययनकर्त्रीं असदृशीमित्यर्थः इमांदमयंतीं अवधृत्यनिश्चित्यतु पुनः विधा
तुः प्रजापतेराशयेमनसिकतमः बहुषुमध्येकउत्तमोजनोस्यादमयंत्याः पतिः स्वामीवसतिविद्यतेइति अहमचिंतयंचिंतितवान् स्वर्गसुंदरीभ्योऽप्यधि-
कसुंदर्यादमयंत्यायोग्यः पतिः कतमोविधिनानिर्मितइतिचिंतितवानित्यर्थः अत्रसहाध्ययनंसादृश्यसूचकं ४१ अनुरूपेति अनुरूपंरूपसदृशंयोग्य-
मित्यर्थः इमंभैम्याः पतिंनिरूपयन् अयमस्यायोग्योवरोयंवेतिविचारयन्नहं अथपश्चात् सर्वेष्वपियुवसुतरुणेषु पूर्वपक्षतां अयोग्यत्वरूपांव्यपनेतुंमत्या

अनुरूपमिमंनिरूपयंन्नथसर्वेष्वपिपूर्वपक्षतां युवसुव्यपनेतुमक्षमस्त्वयिसिद्धांतधियंन्यवेशयं ४२ अनयानवरूपसीमया
कृतसंस्कारविबोधनस्यमे चिरमप्यवलोकिताद्यसास्मृतिमारूढवनीशुचिस्मिता ४३ त्वयिवीरविराजतेपरंदमयंतीकिलकिं
चिंतंकिल तरुणीस्तनएवदीप्यतेमणिहारावलिरामणीयकं ४४ ख्यातुं अक्षमोसमर्थः सन्त्वयिसिद्धांतधियंभैमीयोग्यत्वबुद्धिंन्यवेशयं-
निवेशितवान्त्वमेवतस्यायोग्यइतिनिश्चितवानित्यर्थः भैमीरूपदर्शनेनतरुणत्वव्यापकमयोग्यत्वमितिपूर्वपक्षेनैतद्वाच्यंनलनामनितरुणेतत्संभवादितिसिद्धांतः
४२उभयोः साम्यप्रदर्शनयाराज्ञोनुरागंवर्द्धयति अनयेति शुचिस्मिताशुद्धहास्यासादमयंतीचिरंबहुकालंअवलोकितापिदृष्टापि अनयादृश्यमानयानवरूपसीमया-
सौंदर्यमर्यादयाकृतंसंस्कारस्यपूर्वानुभवजनितभावनाख्यसंस्कारविशेषस्यविबोधनंउद्बोधोयस्यतथाविधस्यमेममअद्यअधुनास्मृतिंआरूढवतीगतवतीस्मर-
णविषयोबभूवेत्यर्थः सदृशवस्तुदर्शनेनहिसंस्कारोद्बोधात् सदृशवस्त्वंतरस्मृतिर्भवति ४३ एवमुभयोःसाम्यंप्रतिपाद्यभैमीतवैवयोग्येत्याह त्वयीति किलसंभा-

वनायांहेवीरहेशूरदमयंत्याःकिलकिंचितंकामचेष्टाविशेषःपरंकेवलंत्वयिविराजतेविशेषेणशोभतेवीरप्रियाःखलुस्त्रियइतिसूचनार्थंवीरेतिसंबोधनंदृष्टांतेनेदंद्रढय-
तिमणिहारावल्यारत्नमालापंक्तेःरामणीयकंसौंदर्यंतरुणीस्तनएवप्रुवत्याएवकुचेदीप्यतेशोभतेनतुवृन्दस्त्रियःयोग्यंयोग्येनयुज्यतेनत्वयोग्येनेतिभावःस्मित
शुष्करुदितहसितत्रासक्रोधभ्रमादीनांसांकर्यंकिलकिंचितमभीष्टतमसंगमादिजान्हर्षादितिसाहित्यदर्पणः ४४ अत्यंतमुत्कंठयन्निनवेति इदंदृश्यमानंतव-
रूपंसौंदर्यंतयादमयंत्याविनाविफलंनिरर्थकं अवकेशिनोवंध्यवृक्षस्य पुष्पमिवतदपिफलशून्यंभवतितयाविनानकेवलंरूपंविफलंकिंतुऋन्द्धधनाप्रचुरध
नापि इयमवनीपृथिवीत्वथाव्यर्थैवतथासंप्रवदसिकापिकूजत्कोकिलापि सुवनीक्रीडावनीकाननकापि अकिंचित्करीत्यर्थः तयाविनेत्यस्यसर्वत्रैवानुषंगः वंध्यो

नवरूपमिदंतयाविनाविफलंपुष्पमिवावकेशिनः इयमृद्धधनाप्यथावनीसुवनीसंप्रवदत्पिकापिका ४५ अ
नयामरकाम्यमानयासहयोगःसुलभस्तुनत्वया घनसंवृतयांबुदागमेकुमुदेनेवनिशाकरत्विषा ४६ न
दहंविदधेतथातथादमयंत्याःसविधेनवस्तव त्वहृदयेनिहितस्तयाभवानपिनेंद्रेणयथापनीयते ४७ फलोवकेशीचेत्यम

रः ४५ यद्यहंतस्यायोग्योवरस्तर्ह्यसुलभासाकथमित्याह अनयेतितुपुनः अमरकाम्यमानयादेवैरपिप्रार्थ्यमानया अनयादमयंत्यासहयोगःसंबंधः त्वयानसु
लभः देवैरपिप्रार्थ्यमानत्वात्सात्वयादुर्लभैवेत्यर्थः उपमिनोति अंबुदागमे प्रावृट्काले घनसंवृतयामेघैराच्छादितयानिशाकरत्विषाज्योत्स्नयासहयोगः कु
मुदेनेवकैरवेणेवयथाकुमुदेनज्योत्स्नयासहयोगोदुःखेनलभ्यते नथेत्यर्थः यथाकदाचित्कुमुदेनापिदैवात्चंद्रिकाप्राप्यतेतथाममसाहाय्यात् त्वयापिसा
प्राप्स्यतइतिभावः ४६ पूर्वश्लोकेनव्यंजितमेवार्थंव्यक्तीकुर्वन् निजप्रयोजकतांदर्शयति नदिति तत्तस्मात् अहंतथातथा तेनतेनप्रकारेणदमयंत्याः

सविधे समीपे नवस्तवं प्रशंसां विदधे करिष्यामि यथा येन प्रकारेण तया दमयंत्या त्वद्दये चित्ते निहितो धृतो मनसा पतित्वेनाभिमत इत्यर्थः भवान् इंद्रेणापि किं पुनर्मनु-
ष्येण न अपनीयते न दूरीकर्तुं शक्यते विदधे अपनीयते इति वर्तमानसामीप्ये लट् ४७ निजौद्धत्यं परिहरन्नाह नवेति अत्र दमयंतीपरिणये केवलां नवसम्म-
तिं अनुमतिं अधिगंतुं ज्ञातुं अत्र तव संमतिरस्ति नवेति निश्चेतुमित्यर्थः इदं निवेदितं मर्म निवेदनं धिक् निंदनीयमेवास्तु हि यतः साधवो महांतो निजोपयोगितां
स्वोपकारित्वं फलेन फलनिष्पत्त्या ब्रुवते वदंति न तु कंठेन कंठरवेण ब्रुवते कंठरवेण न ज्ञापयंतीत्यर्थः कंठो गले गलध्वाने इति बलः ४८ हंसवचनं श्रुत्वा राज्ञो हर्षा-
तिशयमाह तदिति स राजा द्विजाधिपात् हंसात् अथ च द्विजराजात् चंद्रात् अभ्युदितं उत्पन्नं विशदं व्यक्तं स्फुटार्थमित्यर्थः अथ च शुभ्रं तदिदं वचो वचनं-

नव संमतिमत्र केवलामधिगंतुं धिगिदं निवेदितं ब्रुवते हि फलेन साधवो न तु कंठेन निजोपयोगितां ४८
तदिदं विशदं वचोमृतं परिपीयाभ्युदितं द्विजाधिपात् अतितृप्ततयाविनिर्ममे स तदुद्गारमिव स्मितं सितं ४९
परिमृज्य भुजाग्रजन्मना पतगं कोकनदेन नैषधः मृदु तस्य मुदेगिरः किरः प्रियवादामृतकूपकंठजाः ५०

अत्याल्हादकत्वादमृतमिवेति तत्परिपीय श्रुत्वा अथ च पीत्वा अतितृप्ततया अतिहृष्टतया अथ च भोजनाधिक्येन तस्य परिपीतस्य वचोमृतस्य उद्गारमिव व-
मनमिव शितं शुभ्रं स्मितं ईषद्धसनं विनिर्ममे चकार अन्योपि कश्चिद्देवश्चंद्रादुत्पन्नं अमृतं पीत्वा भोजनाधिक्यात् शुभ्रमुद्गारं करोति स्मितस्य शुभ्रत्वं च य-
शसि धवलता वर्ण्यते हासकीर्त्योरिति कविसमयोक्तेः अमृतस्य तु स्वभावादेव विशदः पांडुरे व्यक्ते इति हेमचंद्रः ४९ आश्वासपूर्वकं राजवचनारंभं वर्ण-
यति परिमृज्येति नैषधो नलः कोकनदेन रक्तोत्पलस्वरूपेण भुजाग्रजन्मना करेण पतगं पक्षिणं हंसं परिमृज्य तस्य हंसस्य मुदे हर्षाय मृदु कोमलं यथा तथा गिरो

वचनानिअगिरत् उच्चरितवान्किंभूता: गिर: प्रियवादोमिष्टवचनमेवामृतं जलंतस्यकूपस्तद्रूपोय: कंवस्तस्माज्जायंतइतितादृशा: मनोहरं सरसंच वचनमुवाचेति भा
व: रक्तोत्पलंकोकनदमित्यमर: ५० गिरएवाह नतुलेति हेहंसतव आकृतिराकारो: ववयवइत्यर्थ: तुलाविषये तुलाया औपम्यप्रकारकज्ञानस्याविषयोगोचरउपमेयइ-
त्यर्थ: तस्मिन्तन्मध्ये नगण्यतइतिशेष: असाधारणधर्मवत्वात् नान्य: सदृशीत्यर्थ: अन्यत्तुनायिकावदनादिकंवस्तुचंद्राद्युपममिति तुलाविषयएव तुल्यते साविनि-
तुलाउपमेयंतल्लक्षणोविषयेनउपमानाभावात् किंनूपमानमेवेतिप्रांच: तथा तेतवसुशीलतासाधुस्वभावोवचोवर्त्मनि नवचनगोचरोन वर्णयितुं नशक्यतइत्यर्थ: अ-
तएवआकृतोगुणाइति यत्राकृतिस्तत्रगुणावसंतीतिसासुद्रकस्य भद्राभद्रलक्षणशास्त्रस्यसारोरहस्यंतस्यमुद्रणानियमनात्वदुदाहरणात्वमेवउदाहरणंदृष्टांतोय

ननुतुलाविषयेनवाकृतिर्नवचोवर्त्मनितेसुशीलता त्वदुदाहरणाकृतौगुणाइतिसामुद्रकसारमुद्रणा ५१ नसु
वर्णमयीतनु: परंननुकिवागपितावकीतथा नपरपथिपक्षपातितानवलंबेकिमुमादृशे ऽ पिसा ५२ ॐ:

स्या: सा अन्यथासानिर्विषयास्यादितिभाव: आकृतौगुणाइति यस्य यादृशी आकृतिस्तत्र तादृशागुणास्तिष्ठंतीत्यर्थ: तुलाविषयइति पृथक्करणेसप्तमी पृथक्करण
धर्मस्तुमनोज्ञत्वादिकसूत्वं ५१ पुन: स्तुवन्नाह नसुवर्णमयीति ननुसंबोधनेननुहेहंस परंकेवलंतावकीतवेयंतनु: शरीरंनसुवर्णमयी नहेममयी किंकिंतु ताव-
कीवागपिवाण्यपि तथा सुवर्णमयीशोभनावर्णा अक्षराणियस्यांतत्स्वरूपाशरीरस्यौंदर्यंवाक्पटुत्वंच उभयमेवतवास्तीत्यर्थ: तथातवपक्षपातितापक्षा
भ्यांछंदाभ्यां पततिउड्डयतइत्येवंशीलता परंकेवल अनवलंबे आलंबनशून्ये पथि आकाशमार्गेनकिमुकिंतुसापक्षपातिता अनुकूलवर्तित्वं अनवलंबेनि ११
राश्रये अनन्यगतिकइत्यर्थ: मादृशेपि अस्तीतिशेष: दमयंतीलाभेनिरालंबनस्यममत्वमेवालंबनमितिभाव: ५२ ॐ ॐ ॐ ॐ

भृशेति हेहंसभृशतापं अतिशयितविरहज्वरं बिभर्ति धारयतीति तादृशेनमयाभवान् तुषारस्य हिमस्य सारः श्रेष्ठभागो यत्र तादृशोऽतिशीतल इत्यर्थः मरुदिव-
वायुरिव आसादिप्राप्तः यथाज्वरवतोजनस्य शीतलेन वायुना तापनाशस्तथाविरहज्वरवतोमम भवत्संगमेनेत्यर्थः इदमेवार्थांतरेण समर्थयति धनिनांधनव-
तां कुबेरादीनांइतरः पद्मशंखादिरूपः सन्निधिः सम्यङ्निधिः सतांसाधूनांपुनर्गुणवतांसन्निधिरेवसमागमएव सन्निधिः सम्यक्निधिः नत्वितरः यथाध-
निनांनिधिना हर्षोजायते तथासाधूनां गुणवत्समागमेनेत्यर्थः सन्निति पृथक्पदं वातापस्तुविरहज्वरइतिदर्पणः ५३ अतिमित्रतयाविश्वासं व्यंजयन्नाह
शतशइति त्रिजगतांत्रिभुवनानांमोहेमूर्छायांवशीकरणइत्यर्थः महौषधिः संमोहिनीविद्येत्यर्थः सादमयंतीशतशोनेकवारंममश्रुतिंश्रवणविषयतांआगते

भृशतापभृतामयाभवान्मरुदासादितुषारसारवान् धनिनामितरः सतांपुनर्गुणवत्सन्निधिरेवसन्निधिः ५३
शतशः श्रुतिमागतेनवसात्रिजगन्मोहमहौषधिर्मम अधुनातवशंसितेनतुस्वदृशैवाधिगतामवैमिताम् ५४
अखिलंविदुषामनाविलंसुहृदाचस्वहृदाचपश्यतां सविधेपिनसूक्ष्मसाक्षिणीवदनालंकृतिमात्रमक्षिणी ५५

वशात्सैव नतुसाक्षात्कृतातुपुनः अधुनाइदानींतव शंसितेन कथनेन स्वदृशैव आत्मचक्षुषैव अधिगतां दृष्टांतांदमयंतीं अवैमिजानामि यद्यपिमयानिजचक्षुषा
सानदृष्टातथापि भवत्कर्तृकदर्शनेनैव ममदर्शनसिद्धिरित्यतिमित्रतया अतिशयोक्तिः अधुनेत्यत्रासुनेति क्वचित्पाठः ५४ स्वनयनदर्शनादपि मित्रवचन-
स्याधिक्यमाह अखिलमिति सुहृदाचमित्रेणच स्वहृदाच स्वमनसाच अखिलं समस्तंवस्तु अनाविलमसंदिग्धं यथातथापश्यतांशब्दानुमानाभ्यांजानतां
जनानांअक्षिणीचक्षुषी वदनालंकृतिमात्रं मुखालंकारएव नत्वन्यत्रतयोः प्रयोजनं यतः सविधेऽपि समीपेऽपि किंपुनर्दूरे नसूक्ष्मसाक्षिणी नपरमाणवादि-

क्षुद्रवस्तुग्राहिके परमाण्वादिकं हि चक्षुषा न गृह्यते किंतु मित्रेण मनसा वा शब्दानुमानादिना ज्ञायते एतेन स्वचक्षुषा दर्शनापेक्षया मित्रस्य तव वचनं ममात्यं-
तं विश्वासजनकमिति सूचितं अत्र चकारावुभयप्राधान्यार्थौ ५५ तस्याः श्रवणेन स्वस्य पूर्वरागविप्रलंभमपि किंचिदाह अमितमिति हे खग हे पक्षिन्
हंस अमितं मधु अपरिमितमधुस्वरूपा तत्कथा तस्या दमयंत्याः कथा जनैर्वंद्यादिभिर्मम श्रवणप्राघुणिकीकृता श्रुतेरतिथीकृता सती श्राविता सतीत्यर्थः
मदनानलबोधने अत्रापि ममेत्यस्यानुषंगः मम कामाग्निसंदीपने धाय्या वह्निसमिंधनमंत्रोऽभवत् कामतापजनिका भूतवतीत्यर्थः मम किंभूतस्य धिग
धैर्यधारणः निंदिता धैर्यवतः अधैर्यधारिणोऽस्मान् धिगिति वा अन्योऽपि अपरिमितं मधु पीत्वा पश्चात् संतप्तो भवति अतिथिः स्यात् प्राघुणिक इति बल:

अमितं मधु तत्कथा मम श्रवणप्राघुणिकीकृता जनैः मदनानलबोधने भवत् खग धाय्या धिगधैर्यधारिणः ५६
विषमो मलयाहिमंडलीविषफूत्कारमयो मयोहितः बत कालकलत्रदिग्भवः पवनस्त्वद्विरहानलेधसा ५७

ऋक् सामिधेनी धाय्या च या स्यादग्निसमिंधन इत्यमरः ५६ विषम इति बत खेदे तस्या दमयंत्या विरह एव अनलोऽतिमात्रदाहकत्वाद्वह्निस्तस्य एधसा दाह्य-
त्वात् काष्ठभूतेन मया कालस्य यमस्य कलत्रं अधीशत्वात् भार्या या दिक् दक्षिणा दिक् तद्भवस्तदुत्पन्नः पवनो वायुः मलये मलयाचले वर्तमाना या अहिमंडली -
सर्पसमूहस्तस्या विषफूत्कारमयो विषवह्निदाहकत्वात् विषयुक्तफूत्कारस्वरूपः ऊहितस्तर्कितः विषफूत्कारमयत्वेन संभावित इत्यर्थः ईदृक्कर्णे हेतुगर्भ-
विशेषणमाह यतो विषमः दुःसहः विषेण मा उपमा यस्य स विषोपम इत्यर्थ इति वा यथा फूत्कारसंधुक्षितेन वह्निना काष्ठमतिमात्रं दह्यते तथा अहमपि सर्पाणां वि १२

षफूत्कारमयपवनसंधुक्षितविरहाग्निनाधिकंदह्यइतिभावः कालकलत्रेत्यनेन स्वस्यमरणशंकापिसूचिता ५७ प्रतिमासमिति हेखगअसौ निशापतिश्चंद्रः प्र
तिमासंमासिमासिदिनाधिपंसूर्यंयत्संगच्छति प्राप्नोति समसूत्रपातन्यायेनोपर्यधोभावेन एकराशौमिलतीत्यर्थः ततःसूर्यसंगमाद्धेतोः सचंद्रः तीव्रतरैरति-
तीक्ष्णैर्धैर्यतस्करैर्धृतिचौरैर्धैर्यविलोपकैरित्यर्थः करैः किरणैर्ममदाहायकिमुजाताइतिशेषः अयंभावः चंद्रोहिमकिरणोनदाहकः तथापि मांयद्दहति तन्न
स्वैःकिरणैः किंतुसूर्यसंगमात् तदीयकरैरेवेति ५८ कुसुमेति स्मरेषवः कामबाणा यदिकुसुमानि पुष्पाणि नतु वज्रंतर्न्हि तानि विषवल्लिजानि वि
षलताजातानि कामबाणानांलोकप्रसिद्ध्या पुष्पत्वमेवास्तु माभूद्वज्रत्वं किंतुविषलतोत्पन्नत्वमपि तेषांमंतव्यं कुतएवंवदसीत्याह यद्यस्मात् अमूःस्मरे-

प्रतिमासमसौनिशापतिःखगसंगच्छतियदिनाधिपं किमुतीव्रतरैस्ततःकरैर्ममदाहायसधैर्यत
स्करैः ५८ कुसुमानियदिस्मरेषवोनतुवज्रंविषवल्लिजानितत् हृदयंयदमूःसुहन्नमूर्ममयच्चातितसाम
तीनपन् ५९ तदहानवधौनिमज्जनाममकंदर्पशराधिनीरधौ भवपोतइवावलंबनंविधिनाकेस्मिकसृष्टसन्निधिः ६०

षवोममहृदयंअमूःसुहन् मोहयामासुः यच्चयस्माच्च अतितमांअतिशयेन अतीतपन् तापयामासुः अयंभावः कुसुमानांनमोहजनकत्वं नवातापकत्वं वरंतापा
दिनिवारकत्वमस्ति तथापि यन्मोहयंति तापयंतिच तत्रविषवल्लिजत्वमेवकारणमन्यथाऽसंभवादिति पत्रीरोपइषुर्द्वयोरित्यमरः अमूःसुहन्निति अती-
तपन्निति च णिङंताभ्यांसुहतपाभ्यां लुङोन् अकर्मकत्वात् याशिङ्गेत्यादिना हृदयमिति प्रयोज्यस्य कर्मत्वं ५९ पूर्वोक्तैर्दमयंत्यास्वस्याप्यनुरागितां प्रका-
श्य संप्रति तदर्थंप्रेरयति तदिति तत्तस्मात् अनवधौ सीमारहिते इहकंदर्पशराधिनीरधौ कंदर्पस्य कामस्य शरैर्बाणैर्य आधिर्मानसव्यथा तल्लक्षणेनीरधौ स

मुद्रेनिमज्जतो निमग्नीभवतो ममत्वंपोतइव वहित्रमिव आलंबनं आश्रयोभव त्वंकिंभूतः विधिनाविधात्रादैवेनवाआकस्मिकोऽ कस्मात् सृष्टोविहितः स
न्निधिःसान्निध्यं यस्यताहृशः अन्यस्यापि अनवधौसमुद्रेनिमज्जतोजनस्याकस्माद्विधिवशादुपस्थितपोतआश्रयोभवति पुंस्याधिर्मानसीव्यथेत्यमरःपो-
नः शिशौवहित्रेचगृहस्यानेच्च वाससीतिमेदिनी ६० स्ववचनस्यनिष्फलतांप्रतिपादयन्नस्यंतंप्रेरयति अथवेति अथवेतिपूर्वीनादरेइयंभवतःप्रवर्तनाभ-
वत्कर्मकप्रेरणा कथंपिष्टंनपिनष्टि अपितुपिनष्ट्येव यथापिष्टस्यपेषणंविफलंतथेयं प्रवर्तनाविफलेत्यर्थः कुतइत्याह हि यस्मात् सतां साधूनांपरार्थता परोप-
कारित्वं स्वतएवस्वभावतएवभवतीतिशेषः नतुप्रेरणामपेक्षते यथाग्रहणानां ज्ञानानां स्वतःपरार्थताप्रामाण्यंज्ञानानांस्वतःप्रामाण्यंनतुपरतइतिमीमांसकाःयद्वाग्र

अथवाभवतःप्रवर्तनानकथंपिष्टपिष्टिरियंपिनष्टिनः स्वतएवसतांपरार्थताग्रहणानांहियथायथार्थता ६१ नव
वर्त्मनिवर्ततांशिवंपुनरस्तुत्वरितंसमागमः अपिसाधयसाधयेप्सितंस्मरणीयाःसमयेवयंवयः ६२ ह्यंतेज्ञायंतेअर्थाएभि

रिति ग्रहणानींद्रियाणितेषांयथार्थता अर्थानतिक्रमस्यवर्तिता स्वस्वार्थग्राहकतेत्यर्थः यथाश्रवणादींद्रियाणि सन्निकृष्टंशब्दाद्यर्थमन्यमनपेक्ष्यैव प्रत्यक्षयंतित
थासाधवः परस्यप्रेरणामनपेक्ष्यैव उपकुर्वतीतिभावः उक्तंचनीतिशतके एतेसत्पुरुषाःपरार्थघटकाः स्वार्थंपरित्यज्ययेइति ६१ आशीर्वादादिना हंसंसं-
तोषयन् प्रस्थापयति नवेति वर्त्मनि पथिनवशिवंकल्याणंवर्त तांजायतांपुनः कृतकार्यस्यतवसमागमः मयासहसंमेलनं त्वरितंशीघ्रंअस्तु भवतु अपिकिं
चईप्सितंदमयंतीलाभरूपंममाभीष्टंसाधय साधयनिष्पादयनिष्पादय हेवयः हेपक्षिन् हंसवयंसमयेप्रतिबंधकोपस्थितिकाले स्मरणीयाःस्मर्तव्याः अनु-
ग्राह्याइत्यर्थः प्रतिबंधकोपस्थितिश्चेन्ममालीकप्रशंसयापि कार्यंसाधनीयमितिभावः साधय साधयेति त्वरायां यावद्बोधमित्यनेन द्विरुक्तिः केचित्तु साधय-

गच्छसाधय निष्पादयेति वदंति तन्न समीचीनं नाटकादावेव णिजंतसाधेर्गमनार्थकतया प्रयोगात् तथाच नाट्योक्तिमधिकृत्य प्रायेणान्यंतकः साधिर्गमेः स्था
नेप्रयुज्यत इति साहित्यदर्पणः ६२ हंसेप्रस्थापिते राज्ञोव्यापारमाह इतीति सूनृतवाचि प्रियसत्यवचनेबृहस्पतिरिवेति तादृशः सन्नृपतिर्नलः इतिपूर्वो-
क्तप्रकारेण तंहंसंविसृज्य प्रस्थाप्य धैर्यवान् सन् आकस्मिकतादृशवृत्तांतेनेन दमयंतीलाभेकृतानिश्चयत्वान्धैर्ययुक्तः सन् वनवेश्म उद्यानमध्यस्थक्रीडागृहं
अविशत् प्रविष्टवान् किंभूतः श्रुतिलग्नैः श्रवणविषयैः श्रुतैरित्यर्थः कलहंसशंसितैः राजहंसभाषितैः कलैर्मधुरास्फुटैर्हंसशंसितैर्वा विस्मितः हंसो
प्येवं वदतीति प्राप्तविस्मयः स्मृतिलग्नैरिति पाठेस्मृतिविषयैरित्यर्थः सूनृतंप्रियेसत्ये इत्यमरः ध्वनौ तुमधुरास्फुटे कल इतिच कलहंसस्तु कादंबेराजहंसेनृ

इतितंसविसृज्य धैर्यवान्नृपतिः सूनृतवाग्बृहस्पतिः अविशद्वनवेश्मविस्मितः श्रुतिलग्नैः कलहंसशंसितैः
६३ अथभीमसुतावलोकनैः सफलंकर्तुमहस्तदेवसः क्षितिमंडलमंडनायितंनगरंकुंडिनमंडजोययौ ६४

पोत्तमेइति मेदिनी ६३ हंसप्रस्थानमाह अथेति अथानंतरंसोंडजो हंसः भीमसुतावलोकनैर्दमयंतीदर्शनैस्तदेवाहर्दिनंसफलंसार्थकंकर्तुं क्षितिमंडलस्य
मंडनायितं रमणीयत्वात् दमयंत्यधिष्ठितत्वाद्वालंकारभूतंकुंडिनं नामनगरंभीमपुरंययौ प्रस्थितवान् तदेवेत्यनेन नलनियोगानंतरमेवगतोनतुविलंबः कृतइति
सूचितं तेनच अतिपरोपकारकत्वमस्येति ध्वनितं मंडनायितमिति मंडनमिवाचरतीति कर्तुराय इत्यादिनाआयः ततः कर्तरिक्तः ६४ अथहंसस्ययात्रायांसं-
गलसूचकवस्तुदर्शनं श्लोकत्रयेणाह प्रथममिति कलहंसोराजहंसः पथिमार्गेलोचनातिथिंनयनयोरागंतुकंपथिकानां प्रार्थिताप्रार्थनीया यासिद्धिः कार्यनि
ष्पत्तिस्तां शंसितुंसूचयितुं शीलमस्यतादृशंजलसंभृतंजलपूर्णकलशंपुरोग्रेप्रथमंकलयांबभूव ददर्शअत्रातिथिशब्देनाकस्मात् तादृशकलशोपस्थितिः सूचि

ताबुद्धिपूर्वस्थापितोहिनतथा फलदः यथा आकस्मिकः कलशंलोचनातिथिं लोचनविषयं कलयांबभूव कृतवानित्यन्वयः ६५ अवलंब्येति सहंसः दिदृक्षया सा
र्गावलोकनेच्छया दमयंतीदर्शनेच्छया वा अंबरे आकाशे आश्चर्यरसेनउद्यानदर्शनजनिताद्भुतरसेन अलसं मंदं गतं गमनं क्षणमल्पकालं अवलंब्य आश्रित्य अ
वनीभृतो राज्ञो विलासवने क्रीडाकानने रसाले आम्रद्रुमे संगतं संबद्धं फलं ऐक्षिष्ट दृष्टवान् यात्राकाले फलमात्रस्य दर्शनं कार्यसिद्धिसूचकं विशेषतस्तु आम्र
स्येतिभावः आम्रश्चूतोरसालोऽसाविस्यमरः ६६ नभसइति सपतंगपुंगवः पक्षिश्रेष्ठो हंसः नगं पर्वतं ददर्श दृष्टवान् किंभूतं नगं नभस आकाशस्य कलभैः

प्रथमं पथिलोचनातिथिं पथिकप्रार्थितसिद्धिशंसिनं कलशं जलसंभृतं पुरः कलहंसः कलयांबभूव सः ६५
अवलंब्य दिदृक्षयांबरे क्षणमाश्चर्यरसालसं गतं सविलासवनेऽवनीभृतः फलमैक्षिष्ट रसालसंगतं ६६
नभसः कलभैरुपासितं जलदैर्भूरितरक्षुपन्नगं सददर्श पतंगपुंगवो विटपच्छन्नतरक्षुपन्नगम् ६७
स ययौ धुतपक्षतिः क्षणं क्षणमूर्ध्वायनदुर्विभावनः विततीकृतनिश्चलच्छदः क्षणमालोककदत्तकौतुकः ६८

करिशावकस्वरूपैर्जलदैर्मेघैरुपासितं आश्रितं तथा भूरितराः प्रचुरतराः क्षुपा ह्रस्वशाखाशिफा यस्मिन् तादृशं तथा विटपैः शाखाभिश्छन्नाः अस्तिरोहिताः तरक्षवो
व्याघ्रविशेषाः पन्नगाः सर्पाश्च यत्र तादृशं यात्रायां पर्वतस्य दर्शनमपि मंगलसूचकं करिशावकस्यापितथेति मेघानां तद्रूपत्वमुक्तं तरक्षुपन्नगयोर्दर्शनं तु अशुभ-
सूचकमिति तयोर्विटपच्छन्नत्वमुक्तं कलभः करिशावकइति ह्रस्वशाखाशिफः क्षुपइतितरक्षुस्तु मृगादनइतिचामरः ६७ अथ पंचभिः श्लोकैर्विशिष्य हं-
सस्य गमनमेव वर्णयति सइति सहंस एवंभूतः सन् ययौ गतवान् किंभूतः क्षणं व्याप्य धुता कंपिता पक्षतिः पक्षमूलं येन तादृशः तथा क्षणं ऊर्ध्वायनेन उड्डयने- १४

न दुर्विभावनः दुर्लक्षः एवंक्षणंवितनीकृतौविस्तारितौनिश्चलौ निष्कंपौ छदौ पक्षौयेनताहृशः अतएव आलोककेभ्यः पश्यद्भ्योदत्तंकौतुकंकुतूहलंयेन-ताहृशः स्त्रीपक्षतिः पक्षमूलमिति गरुत्पक्षच्छदाः पत्रमितिचामरः ६८ तन्विति असौहंसः रयात् शीघ्रंलोकानांविलोकनांदर्शनंदर्शनविषयतामि त्यर्थः गतयाभासयातनुर्दीधितिधारयाशरीरकांतिपंक्त्यावेगात् सूक्ष्मभूतयाकांतिपंक्त्यावाकषपाषाणनिभेश्यामवर्णसमानित्वान्निकषप्रस्तरसहृशेन भस्तलेगगनमंडलेछदहेमपक्षसुवर्णकषन्निवउत्कृष्टमपकृष्टंवेतिसंशय्यपरीक्षार्थंघर्षन्निव अलसत् रराज अन्योऽपि उत्कर्षापकर्षसंशयेस्वर्णंनिक षप्रस्तरेकषतीतितथोत्प्रेक्षितं ६९ विनमद्भिरिति श्येनस्यहिंस्रपक्षिविशेषस्यनिपातेपतनेशंकिभिः शंकायुक्तैःरतएव झटितिशीघ्रंविनमद्भिर्नम्री-

तनुदीधितिधारयारयाद्गतयालोकविलोकनामसौ छदहेमकषन्निवालसत्कषपाषाणनिभेनभस्तले ६९
विनमद्भिरधःस्थितैः खगैर्झटितिश्येननिपातशंकिभिः सनिरैक्षिहृशैकयोपरिस्यदसांकारिपतत्रपद्धतिः ७०
दहशेनजनेनयन्नसौभुवितच्छायमवेक्ष्यतत्क्षणात् दिविदिक्षुवितीर्णचक्षुषापृथुवेगद्रुतमुक्तहृक्पथः ७१

भूतैरधःस्थितैः स्वापेक्षया अधोवर्तिभिः खगैः पक्षिभिः एकयाहृशासभयत्वात् अद्वितीययाचक्षुषासहंसउपरिऊर्ध्वंनिरैक्षि हृष्टः किंभूतः स्यदेनवेगेन सांकारिणीसांइति ध्वनिकारिणी पतत्राणांपक्षाणांपद्धतिः पंक्तिर्यस्यसः त्रस्तपक्षिणांस्वभाववर्णनात् स्वभावोक्तिः रंहस्तरसीतुरयः स्यदइत्यमरः पद्ध तिः पथिपंक्तौचेति हेमचंद्रः ७० दहशइति भुविपृथिव्यांतच्छायंतस्यहंसस्यछायांअवेक्ष्यहृष्ट्वातत्क्षणात् दिविआकाशेदिक्षुचवितीर्णंदत्तंचक्षु र्येनताहृशेनसताजनेनयन्गच्छन् असौहंसोनदहशेनहृष्टः किंभूतः यतः पृथुवेगेन अतिशयितवेगेनद्रुतंशीघ्रंमुक्तस्त्यक्तोहृक्पथोहङ्मार्गोयेनताहृशः

टीका

पृथिव्यांछायांदृष्ट्वाकिमयंपक्षीउड्डुयतइतिदर्शनार्थंप्रसारितनयनेनापिजनेनअतिसत्वरगामित्वान्नासौलक्षितइत्यर्थः एतेनकार्यसाधनेहंसस्यसत्वरत्वंसूचितंदि
क्षुइत्यनंतरंचकारोबोध्यः विकीर्णचक्षुषेतिक्वचित्पाठः विक्षिप्तचक्षुषेत्यर्थः तच्छायमिति सेनासुराशालानिशाच्छायाचेतिक्लीबत्वाद्ध्रस्वः दृक्पथइतिऋगादेर-
लर्वत्रेत्यत्समासांतः ७१नवनमितिगतिवेगेनगमनवेगेनप्रसरंतीरुक्कांतिर्यस्यताहृशेनअमुना हंसेनपथिमार्गे क्वचिदपिप्रदेशेउच्चतराणां अत्युच्चानां द्रूणां वृक्षाणांचारुता
सोदृचंचत्र तथाविधंवनंनशिश्रियेनाश्रितंनवासगोत्रजंसजातीय पक्षिजनितं रुतंशब्दः अन्ववादिअनूदितंपक्षिणांहिगमनसमये पथिमध्यवर्तिनिउच्चवृक्षेऽव
स्थानसजातीयरवंश्रुत्वाततत्प्रतिरवकरणंच स्वभावः अनेनतुविलंबभियातदुभयमपिनकृतं एतेनहंसस्यपरोपकारकरणेगाढानुऽरागः सूचितः सगोत्रेतिसमा

नवनंपथिशिश्रियेमुनाक्वचिदप्युच्चतरद्रुचारुतं नसगोत्रजमन्ववादिवागतिवेगप्रसरद्रुचारुतं ७२ अथभीमभु
जेनपालितानगरीमंजुरसौधराजिता पतगस्यजगामदृक्पथंहरशैलोपमसौधराजिता ७३ छ. छः

नोहृगादृविति समानस्यसः सगोत्रबांधवज्ञातिबंधुस्वस्वजनाः समाइत्यमरः ७२ अथहंसस्यकुंडिनपुरदर्शनमाह अथेति भीमोशत्रूणांभयजनकोभुजोबाहूय
स्यताहृशेनधराजिता पृथिवीजयिनाराज्ञाभीमेनपालितारक्षितामंजुर्मनोज्ञा असौनगरीकुंडिनाख्यपुरी पतगस्यहंसस्यदृक्पथंदर्शनगोचरत्वंजगामगताहंसे-
न दृष्टेत्यर्थः किंभूता हरशैलस्यकैलासस्येवउपमासादृश्यंयेषांतैः सौधैः सुधाधवलैराजभवनैराजिताशोभिता कैलासोऽपि भीमस्यशिवस्यभुजेनपालितः अत्रद्वि
तीयचतुर्थपादांतयोःसौधराजितेत्युभयोः साम्याद्यमकेन असौधराजितापिसौधराजितेति विरोधाभासस्यसंकरः धराजितेति धरांजितवानितिक्विप् सौधे-
निसुधयासंस्कृतमितिटण् भीमोदृकोदरेघोरेशंकरेप्यम्लवेतसे इतिसुधागंगेष्टिकास्नुत्योर्मूर्वालेपामृतेष्विचेतिचहेमचंद्रः सौधोस्त्रीराजसदनमित्यमरः ७३ १५

अथ द्वात्रिंशता श्लोकैर्नगरीमेव वर्णयति दयितमिति यत्र नगर्यां स्फटिकोपलः स्फटिकाख्यश्वेतप्रस्तरनिर्मितो विग्रहः शरीरं येषां तादृशाः अत एव शशभृतश्चंद्रस्य भित्तं खंडं तद्वत् निरंका निष्कलंका भित्तयः कुड्यानि येषां तथाविधा गृहाः दयितं भूपतिं भीमं प्रति भुवः पृथिव्याः संतता निरंतरा रतिहासा इव सुरतकालीन-हासा इव रेजिरे शुशुभिरे अन्यस्या अपि स्त्रिया नायकं प्रति सुरतकाले हासा भवंति हास्यस्य शुभ्रत्वेन कविप्रसिद्धत्वादियमुत्प्रेक्षा गृहाः पुंसि च भूम्न्येवेति भित्तं शकलखंडे वा पुंसीति भित्तिः स्त्री कुड्यमेडूकमिति चामरः ७४ नृपेति यत्र नगर्यां नृपस्य राज्ञो नीलमणीगृहत्विषां इंद्रनीलमणिनिर्मितगृहकांतीनां उपधेश्छलात् तमोंधकारो भास्वतः सूर्याद्भयेन शरणार्थं गृहप्रविष्टं सत् रक्षकप्राप्तं वा वासरेपि दिवसेपि उवास वसति स्म किंभूतं तमः असती अविद्यमाना आवृत्तिः पु-

दयितं प्रति यत्र संतता रतिहासा इव रेजिरे भुवः स्फटिकोपलविग्रहा गृहाः शशभृद्भित्तनिरंकभित्तयः ७४ नृप-
नीलमणीगृहत्विषामुपधेर्यत्र भयेन भास्वतः शरणाप्तमुवास वासरेऽप्यसदावृत्त्युदयत्तमं तमः ७५ सितदीप्र-
मणिप्रकल्पिते यदगारे हसदंकरोदसी निखिलान्निशि पूर्णिमा तिथीनुपतस्थेऽतिथिरेकिका तिथिः ७६

नः पुनरुत्पत्तिर्यस्य तादृशं अत एव उदयत्तमं अतिशयेन उदयत् वर्द्धमानं अन्यत्र तमो दिवसेन क्षयति रात्रौ उदयति अत्र तु क्षयोदयाभावादतिगाढमित्यर्थः असती आवृत्तिः प्रतिबंधकं सूर्योदयादि यस्य अत एवोदयत्तममित्यपि प्रांचः एतेन सूर्यादपि भीमस्य बलवत्त्वं सूचितं अत्रापह्नवोत्थापिता भयेनेवेति प्रतीयमानोत्प्रेक्षा उदयत्तममिति उत्पूर्वस्य इण गतावित्यस्य धोर्वादिकस्य शतृतलोऽत्यर्थे तमः शरणं गृहरक्षित्रोरित्यमरः ७५ सितेति यदगारे यस्या नगर्या अगारे गृहे निशि रात्रौ एकिका एकाकिनी पूर्णिमा तिथिः अतिथिर्याचको भूत्वा निखिलान् सर्वान् तिथीन् प्रतिपदादीन् उपतस्थे प्राप्ता आगंतुरूपेण संगतेत्यर्थः पूर्णिमैव सर्वदा तत्र

सीदतिभावः किंभूतेसिताः शुभ्राद्रीप्राद्रीसिमंतोयेमणयः स्फाटिकास्तैः प्रकल्पितेनिर्मितेनतथा हसंतीप्रकाशमानअंकरोदसीसमीपद्यावाभूमीयस्यनाह-
शेयद्वाहसन्नंकोमध्यंययोस्ताहृशेरोदसीद्यावाभूमीयस्यताहृशेप्रतिरात्रिपूर्णिमासंबंधाभावेपितत्कल्पनादतिशयोक्तिः भ्रांतिमानिति पांन्वः तिथिरप्यतिथिरि
तिविरोधाभासश्च अगारइतिजातावेकवचनं एकैकेवेश्मेकिकास्वार्थेकः रोदश्चरोदसीतिचदिविभूमौपृथक्त्वस्यादितिमेदिनी ७६ सुदतीति यत्रनगर्यांवापिका-
क्रीडादीर्घिकासुदतीजनानांसुंदरीजनानांमज्जनेनअवगाहनेनअर्पितैर्घुसृणैः कुंकुमैः कषायितोरक्तीकृतआशयोऽभ्यंतरंयस्यस्ताहृशीसतीअखिलयापि स
कलयापिनिशारात्र्यानप्रससादनस्वच्छजलाबभूवएतेननगर्याबहुसुंदरीजनाधिष्ठितत्वंसूचितं उपमिनोति ग्रहिलानिर्बंधवतीमानिनीव मानवती नायिके

सुदतीजनमज्जनार्पितैर्घुसृणैर्यत्रकषायिताशया ननिशाखिलयापिवापिकाप्रससादग्रहिलेवमानिनी ७७
क्षणनीरवयाययानिशिश्रितवप्रावलियोगपट्टया मणिवेश्ममयंस्मनिर्मलंकिमपिज्योतिरवाह्यमीक्ष्यते ७८

यसापि सुदतीसपत्नीजनेनार्पितैः गाढालिंगनाद्धनाप्रियवक्षसिदत्तैर्घुसृणैः कषायिताशयाकलुषचित्तासतीनायकेनकृतप्रणामाद्युपायापि अखिलयानि-
शानप्रसीदतिघुसृणैः कलुषा अशयानिद्रारहिताइतिवा सूर्यरक्तसंज्ञंतुकुंकुमंजागुडंदीपनंघस्रंसौरभंघुसृणंचेत्यादितित्रिकांडशेषः आशयःस्यादभिप्रायेम
लिनेऽभ्यंतरेत्हदीतिबलः ग्रहोऽनुग्रहनिर्बंधादितिविश्वः ७७ क्षणेति निशिरात्रौक्षणमल्पकालंनीरवयानिःशब्दयासत्यायथानगर्यांमणिवेश्ममयंमणिनि-
र्मितगृहरूपंनिर्मलंउज्ज्वलं किमपिवक्तुमशक्यंअवाह्यंप्राकारमध्यस्थंज्योतिस्तेजईक्ष्यतेस्मदृश्यतेस्मकिंभूतयाश्रितोवप्रावलिरेवप्राकारपंक्तिरेवयोग- १६
पट्टोययातयाअन्ययापियोगिन्याक्षणानिःशब्दयाक्षणोब्रह्मसाक्षात्कारोत्सवःनीरमानंदाश्रुतेवातिप्राप्नोतीतिताहृशयावाश्रितयोगपट्टयाच सत्या निर्मलं

अविद्यादोषरहितं किमप्यनिर्वचनीयं अवाह्यं आंतरंज्योतिः परमात्मानं रात्रौ ईक्ष्यते यानिशासर्वभूतानां तस्यांजागर्ति संयमीति भगवद्गीतोक्तेः इज्यत इति पाठे इज्यते प्राप्यते प्राप्त्यर्थकोऽत्र यज धातुः वप्रः पितरि केदारे वप्रः प्राकाररोधसोरिति धरणिः ७८ विललासेति यानगरी क्वचन कस्मिंश्चित् जलाशयोदरे जलाधाराभ्यंतरे अनुबिंबिता प्रतिबिंबिता द्यौरिव स्वर्ग इव विललास शुशुभे ननु यदि स्वर्गस्य जलाशय पतित प्रतिबिंबस्वरूपेयं नगरी तदा कथं परिखाजलं दृश्यते जले जलस्य प्रतिबिंबाभावादिति जलाशयोदरविशेषणेनोपपादयति किंभूते परिखाकपटेन खेयजलच्छलेन स्फुटस्फुरत् प्रतिबिंबानवलंबितं प्रतिबिंबेनासंबद्धं अंबुजलं यत्र तादृशे अयंभावः जलाशयः स्वर्गापेक्षयाधिकविस्तरः अतस्तन्मध्य एव स्वर्गस्य प्रतिबिंबं पतितं उभयतस्तु यत् प्रति-

विललासजलाशयोदरे क्वचन द्यौरनुबिंबितेव या परिखाकपटस्फुटस्फुरत्प्रतिबिंबानवलंबितांबुनि ७९

व्रजतीं दिवि यद्गृहावलीं चलचेलांचलदंडताडनाः व्यतरन्नरुणाय विश्रमं सृजते हेलिहयालिकालनां ८०

बिंबासंबद्धं जलं तत्परिखाजलमिति युज्यत एवोत्प्रेक्षा स्वर्गसदृशीयं नगरीति पर्यवसितोर्थः खेयंतु परिखेत्यमरः ७९ व्रजतीमिति यद्गृहावली यस्यानगर्याः प्रासादश्रेणी तस्याश्चलानां चंचलानां चेलानां पताकावस्त्राणां यान्यंचलानि प्रांतास्तान्येव दंडाः प्रतोदास्तैस्ताडनाः आघाताः कर्त्र्यः दिवि आकाशे व्रजतेगच्छते हेलिहयालेः सूर्यघोटकश्रेण्याः कालनां प्रेरणां सृजते कुर्वते अरुणाय सूर्यसारथये विश्रमं प्रेरणायां विश्रांतिं व्यतरन् ददुः पताकाप्रांतचांचल्यं अरुणप्रेरणं मत्वा सूर्याश्वास्त्वरितं गच्छंति अतोऽरुणस्य विश्रांतिः एतेन नगरीगृहाणां अत्युच्चता पताकासुक्तता च सूचिता उदात्तोयं लोकातिशयसंपत्तिवर्णनोदात्त मुच्यइतिलक्षणात् दिनमणिहरिहेलिब्रध्नभाकोषभास्वद्दरश्मि खगपतंगेनाहयः सप्तसप्तिरिति त्रिकांडशेषः ८० ६

क्षितिगर्भेति खलूत्प्रेक्षायां यानगरीतलं पातालं मध्यं पृथिवीं उपरि स्वर्गं च पूरयंति उपस्थाप्य तया व्याप्नुवंतीत्येषां तलादिसंज्ञकानामित्यर्थः जगतां सारैः श्रेष्ठां
शास्वरूपैः क्षितिगर्भधरांबरालयैः क्षितिगर्भे पाताले धरायां पृथिव्यां अंबरे आकाशे ये आलया गृहाणि तैः करणैः अजनि निर्मिता किंभूतैः पृथक् प्रत्येकं नि
जचिह्नधारिभिः स्वीयस्वीयचिह्नयुक्तैः पातालचिह्नं निध्यादिकं मध्यचिह्नं धान्यादिकं स्वर्गचिह्नं स्रक्चंदनपर्यंकदिव्यांगनादिकं किंभूता जगत्त्रयसारैर्निर्मितत्वा
दखिलाद्भुता अखिलेभ्यः स्वर्गादिभ्यो ऽद्भुता आश्चर्यज्ञानविषया स्वर्गादौ हि केवलं स्वस्वचिह्नमात्रं अत्र तु सर्वलोकचिह्नानि एतेन नगर्या यथोर्ध्वकोष्ठत्रयव-
त्त्वासादयुक्तता सूचिता ८१ दधदंबुदेति यत्र नगर्यां क्षितिभृन्मंदिरं राजगृहं इंदुमौलिनां अत्युच्चत्वात् चंद्रलग्नशिखरत्वं अथ च शिवत्वं कथं नाम न ऋच्छतु

क्षितिगर्भधरांबरालयैस्तलमध्योपरिपूरिणां पृथक् जगतां खलु याखिलाद्भुता जनि सारैर्निजचिह्नधा
रिभिः ८१ दधदंबुदनीलकंठतां वहदत्यच्छसुधोज्ज्वलं वपुः कथमृच्छतु यत्र नाम न क्षितिभृन्मंदिरमिंदुमौलितां
८२ बहुरूपकशालभंजिकामुखचंद्रेषु कलंकरंकवः यदनेककसौधकंधराहरिभिः कुक्षिगतीकृता इव ८३

न प्राप्नोतु अपि तु ऋच्छत्येव किंभूतं अंबुदेन मेघेन नीलः श्यामः कंठः शिखरसमीपभागो यस्य तस्य भावं दधत् धारयत् तथा अत्यच्छसुधया अतिशु-
भ्रलेपेन उज्ज्वलं उद्दीप्तं वपुर्भित्तिरूपं शरीरं वहत् धारयत् शिवोपि मेघवन्नीलगलतां अतिनिर्मलामृतवच्छुभ्रं शरीरं च दधाति एतेन राजगृहस्यात्यं
तमुच्चत्वं सूचितं कंठो गलसमीपयोरिति धरणिः सुधा लेपोमृतं स्नुही त्यमरः ८२ बहुरूपेति बहुरूपं सौंदर्यं यासां नथाविधायाः शालभंजिका भित्तिषु
निर्मिताः पुत्रिकास्तासां मुखान्येव चंद्रास्तेषु न कृताः कलंकरंकवो लांछनहरिणाः यस्या नगर्या अनेककानां बहुसंख्यकानां सौधानां प्रासादानां कंधरा- १७

सुशिरोधिषु शिखराधोभागेष्वित्यर्थः निर्मिताः ये हरयः सिंहास्तैः कुक्षिगतीकृता इव उदरगतीकृता इव भुक्ता इवेत्यर्थः अदृश्यमानत्वात् चंद्रतुल्यान्यपि निष्कलंकानि तासां सुखानीत्यर्थः एतेन प्रासादानां अतिमनोज्ञ बहुकाष्ठादिपुत्तलिकावत्वं कृत्रिमानेकसिंहवत्वंच सूचितं शालभंजिकास्त्रियां वेश्या-यां काष्ठादिपुत्र्यामिति शब्दाब्धिः ८३ बलिसद्मेति सप्रसिद्धस्तथ्यवाक् सत्यवादी नारदः बलिसद्म दिवं पातालल क्षणं स्वर्गं दिवोपि स्वर्गादपि उपरि उत्कृष्टां अथच ऊर्ध्ववर्तिनीं आह स्म उक्तवान् विष्णुपुराणे स्वर्गलोकादति रम्याणीत्यादिना नारदेन यत् पातालस्य स्वर्गादप्युत्कृष्टत्वमुक्तं तत्स्वर्गादुपरि व-र्तिनि यैवेति भावः यद्येवं स्यात्तर्हि कथं न तथा प्रसिद्धिरित्याह अथ पश्चाद्भुवः पृथिव्या विभूषया अलंकारभूतया भुवो विभूषा शोभा यया तादृश्येति वा-

बलिसद्म दिवं स तथ्यवागुपरिस्माह दिवोऽपि नारदः अधराथ कृता ययैव सा विपरीता जनि भूर्विभूषया ८४
प्रतिहट्टपथे घरट्टजात् पथिकाव्हानदशक्तुसौरभैः कलहान्न घनान् यदुत्थितादधुनाप्युज्झति घर्घरस्वरः ८५

यया नगर्या अधरा अपकृष्टा अथच अधोदेशवर्तिनी कृते वैविपरीता अन्यादृशी अजनि जाता पूर्वं भुवः स्वर्गान्नोर्ध्वमासीदिदानीं तु एतन्नगर्या अधःकृ-तेति वैपरीत्यं स्वर्गपातालाभ्यामप्युत्कृष्टेयं नगरीति पर्यवसितोऽर्थः भूरिभूषयेति क्वचित्पाठः अर्थः सुगमः बलिसद्म रसातलमित्यमरः ८४ प्रतिहट्टेति प्रतिहट्टपथे सर्वेषु क्रयविक्रयस्थानमार्गेषु पथिकानां पांथानां यत आव्हानं आकारणात्तद्ददतीति तथाविधैः शक्तूनां सौरभैः सौगंधैः कृत्वा घरट्टो गोधूमा-दिपेषणपाषाणस्तज्जातात् यस्या नगर्या उत्थितादुदितात् कलहात् विरोधाज्जातो घर्घरः स्वरोति विवादेन स्वरभंगात् घर्घरेत्यव्यक्तो ध्वनिरधुनापि अद्या-पि घनान् मेघान् न उज्झति न त्यजति पांथाः शक्तुसौरभमाघ्राय भोजनलालसया नगरीं परित्यक्तुं न शक्नुवंति मेघास्तु उद्दीपकत्वेन कामपरिवारत्वात् तान् स्व-

गृहान् गमयितुं त्वरयंतीति शक्रुसौरभ्ननिमित्तकोमेघघरट्टयोः कलहः योतिरोषेणोच्चैः स्वरैः कलहं करोति बहुकालपर्यंतं घर्घरस्वरस्तंनमुंचति एतेन मेघव
ङ्गंभीरस्वनबहुघरट्टवत्वंनगर्याः सूचितं ८५ वरणइति कनकस्यवर्णस्य वरणः प्राकारएव अमराद्रिः सुमेरुः मानिनीं प्रणयकोपवतीं अतएव अंकात् क्रो
डात् आगतां यांनगरीमेव दिवं परिरभ्य आलिंग्य अनुनयन् प्रसादयन् उवासवसनिस्मकथमयं सुमेरुस्त्वयाज्ञात इतिविशिनष्टि किंभूतः घनानिनिबिडा-
निरत्नानि यत्रतादृशेये कवाटे तेएवपक्षती पक्षमूले यस्यतादृशः तस्यसपक्षत्वात् अन्योपि अन्यत्रगतां मानिनीं परिरभ्यानुनयन् तदनुरोधात्तत्रैव वसति ए
तेन सुमेरुवदत्युच्चसौवर्णप्राकारवत्वं स्वर्गसाम्यंच नगर्याः सूचितं प्राकारो वरणः शालइत्यमरः ८६ अनलैरिति यानगरी उदयंलयं अंतरा उदयस्यलयस्यच

वरणः कनकस्य मानिनीं दिवमंकादमराद्रिरागतां घनरत्नकवाटपक्षतिः परिरभ्यानुनयन्नुवासयां ८६ अन
लैः परिवेशमेत्य याज्वलदर्कोपलवप्रजन्मभिः उदयंलयमंतरा रवेरवहद्बाणपुरी परार्ध्यतां ८७ बहुकंबुम-
णिर्वराटिकागणनाटत्करकर्कटोत्करः हिमवालुकयाच्छवालुकः पटुदध्वान यदापणार्णवः ८८ मध्येदिवसइत्यर्थः ज्वलं

तोये अर्कोपलवप्राः सूर्यकांतमणिनिर्मितप्राकारास्तेभ्योजन्मयेषां तादृशैरनलैर्वन्हिभिः परिवेशं वेष्टनं एत्य प्राप्य बाणपूर्याः शोणितपुरस्य परार्ध्यतां-
श्रेष्ठतां सा दृश्यमित्यर्थः अवहत् दधार बाणपुर्यपि शिवप्रसादाच्चतुर्दिक्षु वन्हिवेष्टितासीदिति प्रसिद्धिः उदयंलयमंतरेति अंतरायोगे हादियुक्तादिति द्वि
तीया वप्रः प्राकाररोधसोरितिविश्वः ८७ बहुकेति यस्यानगर्या आपणो हट्टएव अर्णवः समुद्रः पटु अतिशयं यथा तथा दध्वान शब्दितवान् किंभूतः बहु
वः कंबवः शंखा मणयो मौक्तिकादयश्च यत्र तादृशः वणिग्भिर्विक्रयार्थं नानादेशादानीतत्वात्तत्र बहवः शंखा मणयश्चासन्नित्यर्थः समुद्रेपि शंखाविद्रु-

१८

मादिमणयश्चतिष्ठंतितथावराटिकानांकपर्दूनांयागणनासंख्यानंतत्रअटंतश्चलंतोयेकराजनानांहस्तास्तएवकर्कटाः कुलीरास्तेपांसुत्करः समूहोयत्रसः स
मुद्रेपिवराटकाः कर्कटाश्चविद्यंते तथाहिमवालुकयाकर्पूरेण अच्छाः शुभ्राबालुकाः सिकतायत्रतथाभूतः समुद्रेपिशुभ्रवालुकास्तिष्ठंति पद्धित्यनेन ज
नसंमर्दः सूचितः हिमवालुकयेतिधान्येन धनवानितिवदूभेदेतृतीया शंखःस्यात् कंबुरस्त्रियामिति स्यात्कुलीरः कर्कटकइति अथकर्पूरमस्त्रियां घनसारश्चं
द्रसंज्ञः सिताभ्रोहिमवालुकेतिचामरः ८८ यदगारेति प्रतिचंद्रोदयंचंद्रोदयेअभ्रगंगया आकाशगंगयामंदाकिन्यायस्यानगर्याअगारघटानांगृहसमूहा-
नांयेअट्टाउपरिगृहास्तेषांकुट्टिमेषुबद्धभूमिषुस्रवंतः क्षरंतोयेइंदूपलाश्चंद्रकांतमणयस्तैस्तुंदिलाबहुतराआपोजलानियस्यास्तथाभूतयासत्यापतिव्र

यदगारघटाट्टकुट्टिमस्रवदिंदूपलतुंदिलापया मुमुचेनपतिव्रतोचितीप्रतिचंद्रोदयमभ्रगंगया ८९ रुचयोस्तमि
तस्यभास्वतःस्खलितायत्रनिरालयाःखलु अभिसार्यमभुर्विलेपनापणकश्मीरजपण्यवीथयः ९० छ

तोचितीसतीत्वौचित्यंनमुमुचेनत्यक्ताचंद्रोदयेहिसमुद्रस्यजलवृद्धिर्भवति गंगापितत्पत्नी अतश्चंद्रोदयेजलवृद्धिरूपः पत्युर्धर्मस्तस्याअपिचंद्रकांतक्षरितज
लेनजातइति पातिव्रत्यौचित्यंपतिव्रतालक्षणमाह हारीतः आर्तार्तेमुदितेहृष्टाप्रोषितेमलिनाकृशा मृतेम्रियेतयापत्यौसाध्वीज्ञेयापतिव्रतेति एतेनमंदाकिन्या
अपिअट्टकुट्टिमानामधोवर्तित्वंसूचितंनगर्यागृहाःचंद्रकांतमणिनिर्मितकुट्टिमाअत्युच्चतराश्चेतिपर्यवसितोर्थः तुंदिलापयेतितुंदादेरत्सर्वत्रेत्यत्समासांतःउ
दात्तोयं ८९ रुचयइति यत्रनगर्याअभिसार्यंसंध्यासमयेविलेपनापणेगंधद्रव्यविक्रयहट्टेकाश्मीरजपण्यानांकुंकुमरूपविक्रेयद्रव्याणांवीथयोमार्गाः अभुः
शोभंतेस्मउत्प्रेक्षतेखलूत्प्रेक्षायां अस्तमितस्यअस्तंगतस्यभास्वतःसूर्यस्यस्खलिताश्च्युताःनिरालयानिराश्रयारुचयइवकिरणाइवअभुरिति भादीसौविदे

रुरुद्विषादंता हूति अनउस् वीथी वर्त्मनि पंक्तौ च गृहांगेनात्ध रूपक इति हेमचंद्रः वितत्तमिति यत्र नगर्यां आपणे हट्टे पणितुं विक्रेतुं वणिजा वणिग्जनेन विततं विस्तृतं
अखिलं सर्वं जगतां वस्तु द्रव्यं जनेन क्रेतृजनेन पुरा पूर्वं वीक्ष्यते हृष्टं उपमिनोति यथा मृकंडुसूनुना मार्कंडेयेन मुनिना हरेर्बालरूपस्य भगवत उदरे जठरे जगतां व
स्तु पुरा वीक्ष्यते तथा पुरा किल एकार्णवे जगति न्यग्रोध शाखावधिरूढबालकाकृति नारायणस्योदरं प्रविश्य मार्कंडेयेन तत्र सर्वं जगत् हृष्टं वणिजेत्यत्र आपण इत्य
त्र च एकवचनेन एकस्यापि वणिज एकस्मिन्नप्यापणे सर्वं वस्तु हृष्टमिति सूचितं वीक्ष्यत इति स्मा पुरा पुरसयोग इत्यादिना भूते लट् ९१ समभिति यस्यां नगर्यां -
आपणे हट्टे पणिता विक्रेता एणमदैः कस्तूरीभिः समं सहसौरभलोभनिश्चलं सौरभाभिलाषेण निष्पंदं मलीमसं श्यामलं गुंजंतमपि शब्दायमानमपि अलिं भ्र

विततं वणिजापणेऽखिलं पणितुं यत्र जनेन वीक्ष्यते मुनिनेव मृकंडुसूनुना जगतां वस्तु पुरोदरे हरेः ९१ समसमेण
मदैर्यदापणे तुलयन्सौरभलोभनिश्चलम् पणितानजना रवैरवैदपि गुंजतमलिं मलीमसम् ९२ रविकांतमयेन
सेतुना सकलाहर्ज्वलनाहितोष्मणा शिशिरे निशि गच्छतां पुराच्चरणौ यत्र दुनोति नो हिमम् ९३ ॐ ॐ

मरं तुलयन् परिमापयन् जनारवैर्लोकानां कोलाहलैर्न अवैत् न ज्ञातवान् यद्यपि निश्चलत्वात् मलीमसत्वेन वर्णसाम्याच्च ज्ञातुं न शक्यते तथापि गुंजनादपि न
ज्ञेयः जनारवैर्गुंजनस्यांतर्हितत्वादिति भावः मीलितमिदं मीलितं वस्तुनो गुप्तिः केनचित्तुल्यलक्ष्मणेति लक्षणात् अवैदिति अवपूर्वादिणगतावित्यस्मा-
ल्लङे दुडू हृद्विरजादेरिति वृद्धिः ९२ रवीति यत्र नगर्यां शिशिरे शीतकाले रविकांतमयेन सूर्यकांतमणिनिर्मितेन अतएव सकलाहः समस्तदिनं व्याप्य य
त् ज्वलनं तेनाहितोऽर्पित उष्मा औष्ण्यं यत्र ताहृशेन सेतुना निशि रात्रौ गच्छतां जनानां चरणौ हिमं कर्तृ पुरा नो दुनोति नो पीडयति स्म सकलाहरिति नेत्वानित्याइति १९

समासांतनिषेधः प्रांचस्तु सकलाहृज्वलनेत्यादिनीरेफमेव पाठं धृत्वा व्याख्यातवंतः यद्यपि जनानामिति बहुत्वबोधात् चरणावित्यत्र द्विवचनप्रयोगो न युज्यते त
थापि प्रत्येकापेक्षया द्वित्वं बोध्यं दुनोतीति स्माद्युक्ते इत्यादिना पुरायोगे भूते लट् ९३ विधुत्विति कलितीव्रः कलिर्युगं बहुः सह आतपः शशिकांतमयं चंद्रकां
तमणिनिर्मितं अतएव रात्रौ विधुदीधीतिजेन चंद्रकिरणसंपर्काज्जातेन पयसाजलेन नैषधशीलवन्नलस्वभाववत् शीतलं यत्पथं यस्यानगर्याः पंथानं तपाग
मे ग्रीष्मसमयेपि न तपति स्म नोष्णीचकार रात्रौ क्षरितचंद्रकांतजलेन सर्वंदिनं शीतल एव पंथास्तिष्ठतीति भावः यत्पथमिति ऋगादेरत् सर्वत्रेत्यत्समासांतः ९४
परिखेति यानगरी परिखावलयच्छलेन परिखामंडलव्याजेन कुंडलनां वेष्टनं अवापिता अर्थात् पराजितशत्रुभिः प्रापिता सती परेषां अन्येषां ग्रहणस्य आयत्ती

विधुदीधितिजेन यत्पथं पयसा नैषधशीलशीतलम् शशिकांतमयं तपागमे कलितीव्रस्तपतिस्म नातपः ९४
परिखावलयच्छलेन या न परेषां ग्रहणस्य गोचरः फणिभाषितभाष्यफक्किकाविषमा कुंडलनामवापिता.
९५ सुखपाणिपदाक्षिपंकजै रचितांगेष्वपरेषु चंपकैः स्वयमादित यत्र भीमजा स्मरपूजाकुसुमस्रजः श्रियम् ९६

करणस्य न गोचरो न विषयः अजय्यत्वचिह्नभूतां कुंडलनां दृष्ट्वा शत्रवो दूरत एव तां परित्यज्य निवर्तंत इति भावः किंभूता फणिना शेषनागेन भाषितं यद्भाष्यं तत्र-
या फक्किका पूर्वपक्षस्तद्वद्विषमा दुर्ग्राह्या भाष्यफक्किकापि विषमा दुर्ज्ञेया अतएव ज्ञातुमशक्तैः कुंडलनां प्रापिता सती अन्येषां ग्रहणस्य ज्ञानस्य गोचरो न-
भवति ९५ सुखेति यत्र नगर्यां भीमजा दमयंती स्मरस्य कामस्य पूजार्थे या कुसुमस्रक् पुष्पमाला तस्याः श्रियं शोभां स्वयं आदित गृहीतवती कामपूजापुष्प-
मालास्थाने सैव जातेत्यर्थः किंभूता सुखपाणिपदाक्षिपंकजैर्वदनकरचरणनयनरूपगौररक्तनीलोत्पलैः रचिता निर्मिता तथा अपरेषु अन्येषु अंगेषु अवयवे-

षुन्वंपकैश्चंपककुसुमैरचितामालापिनानाविधैः पुष्पैः क्रियते तस्यासुखाद्यंगानि पद्मतुल्यानि अन्यानितुचंपकसमानवर्णानीतिभावः आदितेति आङ्पूर्वो ह्रूञो
लुङ्नः सङ्स्याद्वाधाधेदधेद्वानदेङनामात्मनेसङीतिइड् सङ् लुङिणादेरितिसङ्लुक्इडादावित्याकारलुक्निदर्शनेयं ९६ जघनेति भुवमुत्क्षेशतमप्सर
सः जघनस्तनयोर्नितंबकुचयोर्भारेण स्थौल्येन यद्गौरवंगुरुत्वं तस्माद्धेतोः वियद्वाकाशमालंब्यआश्रित्यविहर्तुंक्रीडितुं अक्षमा अशक्ताःसत्यःअवतीर्यआगत्य-
तत्सखीजनो दमयंतीसखीजनो भूत्वायांनगरीं अध्यासत अधितिष्ठंतिस्मदमयंत्याः सख्योप्सरस्तुल्याइत्यर्थः यामिति यत्रार्थोधिष्ठादेरिति आधारस्यक-
र्मत्वं ९७ स्थितीति यानगरीस्थित्यामर्याद्याशालिनः शोभमानाः समस्तावर्णाब्राह्मणादयोयत्र तस्याभावस्तत्तांकथंनबिभर्तुनधारयतु अपितुबिभर्त्येवे

जघनस्तनभारगौरवाद्वियदालंब्यविहर्तुमक्षमाः भुवमप्सरसोवतीर्ययांशतमध्यासततत्सखीजनः ९७
स्थितिशालिसमस्तवर्णतांनकथंचित्रमयीबिभर्तुयो स्वरभेदमुपैतुयाकथंकलितानल्पमुखारवानवा ९८

त्यर्थः अतएवचित्रमयीआश्चर्यरूपा अन्यत्रब्राह्मणादयोनमर्यादावंतोत्रतुसर्वेषांयथायथंमर्यादावत्वादाश्चर्यरूपत्वंस्थितिः सीमावाअन्यत्र ब्राह्मणादीनांरा
जदत्तवास्तुसीमानास्ति अत्रतुसमस्तब्राह्मणादिवर्णेभ्योराज्ञासीमादत्तेति आश्चर्यरूपत्वं अथच याचित्रमयी आलेख्यप्रचुरासास्थितिशालिनःसमस्त
वर्णाःशुक्लरक्तादयोयत्र तत्तामवश्यंदधाति तथावासमुच्चयेकलिता धृताअनल्पानांबहूनांनरकरितुरगादीनांमुखारवामुखशब्दायया ताहृशीयानगरी स्वरभेदं
घर्घरादिनानाशब्दत्वं कथंनउपैतुनप्राप्नोतु अपितु उपैत्येवेत्यर्थः अथच कलितोनल्पमुखस्यचतुर्मुखस्यब्रह्मणोमुखारवो वेदध्वनिरूपोयत्र ताहृशीया
सास्वरभेदं उदात्तादिस्वरत्रयवत्व कथंनोपैतु यद्वाकलिताअनल्पमुखाबहुमुखाब्रह्मशिवकार्तिकाद्या अकारोविष्णुःरोवह्निःवोवरुणश्चयया ताहृशी- २०

यासास्वर भेदंस्वर्गादभेदंकथंनोपैतुस्थितिः स्त्रियामवस्थानेमर्यादायांच सीमनीतिमेदिनी वर्णोद्विजादौ शुक्लादौ स्तुतौवर्णंतुचाक्षरइतिआलेख्याश्चर्ययोश्चि-
त्रमितिचामरः अकारोविष्णुरुद्दिष्ट इनिरस्तीक्ष्णदहने इतिवः पश्चिमदिग्गीशेस्यादितिच कोषांतरं ९८ स्वरुचेति माणिक्यमयामाणिक्याख्यरत्नविशे-
षनिर्मितायदालयायस्यानगर्यागृहाः दिनंव्याप्यसमीयुषा संगतेनअर्केणसूर्येणहेतुनाउन्तृषउन्तृष्णाः संतःनिशिरात्रौस्वरुचानिजकांत्याअरुणाया-
आरक्तया पताकया बहुधाबहुवारंसुधाकरंचंद्रं लिलिहुः अस्पृशन् पताकायांजिव्हात्वारोप आर्थः सापिआरक्ता अन्येपिदिवसेसूर्यकिरणेनोत्त-
प्ताः संतोरात्रौशीतलंवस्तुलिहंति अत्रगृहाअस्युच्चा इतिपर्यवसितोर्थः९९लिलिहइति पूर्वोक्तएवार्थः प्रकारांतरेणवर्णितः अमलपद्मरागजंनिर्मलप-

स्वरुचारुणयापताकयादिनमर्केणसमीयुषोन्तृषः लिलिहुर्बहुधासुधाकरंनिशिमाणिक्यमयायदालयाः ९९
लिलिहेस्वरुचापताकयानिशिजिव्हानिभयासुधाकरं स्थितमर्ककरैःपिपासुयन्नृपसद्मामलपद्मरागजं १००
अमृतद्युतिलक्ष्मपीतयामिलितंयद्वडभीपताकया वलयाधितशेषशायिनःसरिवतामादितपीतवाससः १०१ छं

द्मरागमणिनिर्मितं अर्ककरैर्हेतुभिः पिपासुपातुमिच्छुकमिव स्थितंयस्यानगर्यान्नृपसद्मराजमंदिरं निशिरात्रौरवस्येवरुक् कांतिर्यस्यास्ताहृश्याआ-
रक्तयेत्यर्थः अतएवजिव्हानिभया जिव्हातुल्ययापताकया सुधाकरंचंद्रंलिलिहेआस्वादयामास लिलिहइति स्वरितेत्वात् कर्तृस्थक्रियाफलताविव-
क्षायामात्मनेपदं १०० अमृतेति पीतया गौरवर्णयायस्यानगर्यावडभीपताकयाउपरिगृहविशेषवैजयंत्या मिलितंसंबद्धं अमृतद्युतेश्चंद्रस्य लक्ष्मलां-
छनं कर्तृवलयाधितो मंडलीभूतोयः शेषोनंतनागस्तस्मिन् शेतइत्येवंशीलस्य पीतवाससः कृष्णस्य सखितां सादृश्य आदित जग्राह कलंकमभितोवर्त-

मानस्यचंद्रावयवस्य शेषसादृश्यंकलंकस्य कृष्णसादृश्यंपीतपताकायाः पीतवस्त्रसादृश्यं एतेनात्युच्चतागृहाणांसूचितापीतवाससइतितद्गुणसंविज्ञान बहुव्रीहिः अश्रांतेति यस्यानगर्याः प्रासादानांराजभवनानांदेवभवनानांवा दुकूलवल्लिर्दीर्घत्वात् लतारूपाश्वेतक्षौमपताका अनिलांदोलैर्वीचुचालनैर्दि- वि आकाशे अरवेलत् क्रीडतिस्मउत्प्रेक्षते किंभूता पूर्वंपुरागाधिसुतेनविश्वामित्रेणसाभिघटिता वर्द्धूनिर्मिता अनुपश्चात् ब्रह्मणः स्तुत्यामुक्तापरित्यक्तामंदा- किनीस्वर्गंगेवप्रतीयमानोत्प्रेक्षा मंदाकिनीनुमंदाकिनीवनुरिवार्थे वितर्केवेति केचित् साभिघटितत्वे गाधिसुतस्य हेतुगर्भंविशेषणमाह किंभूतेन अश्रां तश्रुतिपाठेननिरंतरवेदपाठेनपूताभ्यः पवित्राभ्योरसनाभ्योजिव्हाभ्य आविर्भूतेषुजातेषुभूरिषुबहुषुस्तवेषुस्तुतिषु अजिह्मोनलसोयोब्रह्मणोसुरवोघोसु-

अश्रांतश्रुतिपाठपूतरसनाविर्भूतभूरिस्तवाजिह्मब्रह्मसुरवोघविघ्नितनवस्वर्गक्रियाकेलिना पूर्वंगाधिसुतेनसाभिघ टितामुक्तानुमंदाकिनी यत्रासादद्दुकूलवल्लिरनिलांदोलैररवेलद्दिवि १०२ यदतिविमलनीलवेश्मरश्मिभ्रमरितभाः शुचिसौधवस्त्रवल्लिः अलभतशमनस्वसुः शिशुत्वं दिवसकरांकतलेचलालुठंती १०३

रवचतुष्टयं तेनविघ्नितासविघ्नीकृता नवस्वर्गक्रियाकेलिः नवीनस्वर्गसृष्टिरूपक्रीडा यस्य तादृशेनपुराकिल त्रिशंकोस्स्वर्गागमने इंद्रेणनिवारिते कुपितोविश्वा मित्रोनवीनस्वर्गादिसृष्टिमारभ्य ब्रह्मादिभिरर्थितोर्ध्वंकृतांसृष्टिंतत्याजेति पौराणिकी वार्ता साभिघटितेति स्वयंसाभिनिकेनेतितत्पुरुषः संगार्थेचभद्दृष्टार्थे सा- भिनिंदार्धयोर्मतमिति मेदिनी शार्दूलविक्रीडितमिदंवृत्तं १०२ यदतीति यस्यानगर्याअतिविमलानिनिर्मलतराणि यानिनीलवेश्मानिनीलकांतमणिनिर्मितगृ- २१
हाणि तेषांरश्मिभिः किरणैः भ्रमरिता भ्रमरवदाचरिता श्यामीकृतेत्यर्थः भादीप्तिर्यस्यास्तादृशी शुचिः शुभ्रासौधानांवस्त्रवल्लिः पताकापंक्तिः दिवसकर-

स्यसूर्यस्य अंकनले समीपाधोभागे चलावानसंबंधाच्चंचला लुठंतीक्रीडंतीसती शमनस्वसुर्यमुनायाः शिशुत्वंशैशवं अलभत प्राप्ता बालिका यमुनेव शोभतेस्मेत्य-
र्थः सापि श्यामा बाल्याच्चंचला सूर्यस्य अंकतले क्रीडाभागे क्रीडतिस्म पुष्पिताग्राहृत्तमिदं तल्लक्षणमाह केदारभट्टः अयुजिनयुगरेफतो यकारो युजिच नजौ जरगाश्च
पुष्पिताग्रेति १०३ स्वप्राणेश्वरेति यस्यानगर्याः कामिनीस्त्रीविशेषः विमानेन व्योमयानेन कलितं आश्रितं नर्मभूमीकृतमिति प्रांचः व्योम आकाशं याभिस्त
थाविधाः साक्षात्प्रत्यक्ष दृश्यमाना अप्सरस एव स्वर्वेश्या एव अभवत् कथमित्याह यत् यस्मात् स्वप्राणेश्वरो निजप्रियस्तस्य नर्महर्म्यक्रीडागृहं तस्य कटके स-

स्वप्राणेश्वरनर्महर्म्यकटकातिथ्यग्रहायोत्सुकं पाथोदं निजकेलिसौधशिखरादारुह्य यत्कामिनी साक्षादप्सर
सोविमानकलितव्योमान एवाभवद्यान्नप्रापनिमेषमन्तरसा यांतीरसादध्वनि १०४

ध्यदेशे आतिथ्यग्रहाय उत्सुकं उत्कंठितं अर्थान्तद्भिसुखगामिनमित्यर्थः पाथोदं मेघं निजकेलिसौधशिखरात् स्वकीयक्रीडागृहोपरिभागात् आरुह्य अन्त-
रसा मेघवेगेन रसात् मेघवेगजनितप्रीतेः प्रियानुरागाद्वा अध्वनि पथि यांती गच्छंती सती निमेषं निमेषोपलक्षितमपि विलंबं अथच नेत्रसंकोचं नप्राप नप्रा-
प्तास्वाभाविकस्तो दर्पण विमानस्यद्वारमेघारोहणेन आकाशगमनेन निमेषाभावाच्च अप्सरस्तुल्याजातेति भावः कटकशिखर पदाभ्यां हर्म्याणां पर्वतसाम्यं प्र-
तिपाद्य अत्युच्चत्वं सूचितं हर्म्यादि धनिनां वास इति कटकोऽस्त्री नितंबो द्रेरिति कूटोऽस्त्री शिखरं शृंगमिति साक्षात्प्रत्यक्षतुल्ययोरिति स्त्रियां बहुष्वप्सरस इति
व्योमयानं विमानोऽस्त्रीति चामरः शार्दूलविक्रीडितमिदं वृत्तं १०४

वैदर्भीति वैदर्भ्यां दमयंत्याः केलिशैलेनानामणिमयकृत्रिमक्रीडापर्वते मरकतशिखरात् मरकताख्यमणिनिर्मितशृंगात् उत्थितैरुद्गतैः अंशवः किरणा एव द- सर्ग
१२ र्भास्तृणांकुरास्तैः करणैः यस्या नगर्या गोग्रासप्रदानरूपं यद्व्रतं दीर्घकालानुपालनीयसंकल्पविषयविशेषः तज्जन्यं सुकृतं पुण्यं अविश्रांतं निरंतरं उज्जृंभितेः २
स्मावर्धते स्म कथंभूतं गोग्रासत्वमिति विशेषणद्वयेनोपपादयति ब्रह्मांडे ऊर्ध्वकटाहे यआघातोभिघाताख्यसंयोगविशेषस्तेन भग्नः संकुचितः स्यदजो वेग
जातो मदो गर्वो येषां तेषां भावस्तत्ता तया ह्रिया लज्जयेव धृतं कृतं अवाङ्मुखत्वं अधोमुखत्वं यैस्तादृशैः अतएव दिवि स्वर्गे उत्तानगायाः उत्तानगामिन्याः क-
स्याः सुरसुरभेर्देवगव्यान आस्यदेशागतार्ग्रैः अन्योपि भग्नगर्वो लज्जयाधोमुखो भवति स्रग्धरावृत्तमिदं तल्लक्षणं यथा म्रभ्नैर्यानांत्रयेण त्रिमुनियतियुता स्रग्ध

वैदर्भीकेलिशैले मरकतशिखरादुत्थितैरंशुदर्भैर्ब्रह्मांडाघातभग्नस्यदजमदतया ह्री धृतावाङ्मुखत्वैः कस्यानोत्ता-
नगाया दिवि सुरसुरभेरास्यदेशागताग्रैर्यद्गोग्रासप्रधानव्रतसुकृतमविश्रांतमुज्जृंभते स्म १०५ विधुकरपरिरंभा
दात्मनिष्यंदपूर्णैः शशिदृषदुपक्लृप्तैरालवालैस्तरूणां विफलितजलसेकप्रक्रियागौरवेण व्यरचि स तृहनचित्तस्तत्र भैमी
वनेन १०६ रार्कीर्तितेयं १०५ नगरीवर्णनं समाप्तं अथ हंसस्य दमयंतीवनदर्शनेन हर्षाधिक्यमाह विधुकरेति तत्र नगर्यां स हंसो भैमीवनेन द-
मयंत्याः क्रीडावनेन रमणीयत्वात् हृतचित्तः आकृष्टमना व्यरचि विरचितः किंभूतेन वनेन शशिदृषद्भिश्चंद्रकांतोपलैरुपक्लृप्तानि निर्मितानि तैः अतएव विधुक
रपरिरंभात् चंद्रकिरणसंबंधात् य आत्मनः स्वस्य निष्यंदः क्षरणं तेन पूर्णैस्तरूणां वृक्षाणां आलवालैर्विफलितं व्यर्थीकृतं जलसेकप्रक्रियागौरवं जलसेचनरू- २२
पव्यापारप्रयासो यस्मिन् तादृशन वृक्षाणामालवालपूरणं चंद्रकांतैरेव क्रियते अतोत्र जलसेचनप्रयासो निष्फल इति भावः इतः प्रभृति श्लोकचतुष्टयं मालिनीवृत्तं

तल्लक्षणं ननमयययुतेयं मालिनी भोगिलोकैरिति १०६ तस्मिन्वने हंसस्य दमयंतीदर्शनमाह अथेति अथानंतरं कनकपतत्रः स्वर्णच्छदो हंसः तत्र क्रीडाव-
ने तां राजपुत्रीं दमयंतीं अक्षिलक्षीचकार चक्षुरिंद्रियजन्यज्ञानविषयीकृतवान् दृष्टवानित्यर्थः किंभूतां सदृशभासां समानकांतीनां सखीनां वयस्यानां सदसि स-
भायां विस्फुरंतीं विशेषेण शोभमानां पुनः किंभूतां उडुपरिषदि नक्षत्रसभायां मध्यस्थायिनी मध्यवर्तिनी या शीतांशुरेखा चंद्ररेखा तस्या अनुकरणे सदृशीक-
रणे पटुः समर्था लक्ष्मीः शोभा यस्यास्तादृशीं यथा नक्षत्राणां मध्ये चंद्ररेखाधिकसौंदर्या तथा सखीनां दमयंतीति भावः सदृशभासामिति विशेषणं तत्सखी

अथ कनकपतत्रस्तत्र तां राजपुत्रीं सदसि सदृशभासां विस्फुरंतीं सखीनां उडुपरिषदि मध्यस्थायि शीतांशुरेखा-
नुकरणपटुलक्ष्मीमक्षिलक्षीचकार १०७ भ्रमणरयविकीर्णस्वर्णभासा खगेन क्वचन पतनयोग्यं देश-
मन्विष्यताधः सुखविधुमदसीयं सेवितुं लंबमानः शशिपरिधिरिवोर्ध्वे मंडलस्तेन तेने १०८ ६ ६

नामप्यन्यसुंदरीभ्यो विशिष्टसौंदर्यज्ञापनार्थं तारकाप्युडु वा स्त्रियामित्यमरः १०७ तत्रास्य पतनेच्छामाह भ्रमणेति भ्रमणरयेण भ्रमणवेगेन विकीर्-
णा विक्षिप्ता स्वर्णभासः सुवर्णकांतयो येन ता दृशेन तथा क्वचन कुत्रापि अधः प्रदेशे पतनयोग्यं अवतरणोचितं देशं अन्विष्यता पर्यालोचयता तेन खगेन हंसे-
न ऊर्ध्व ऊर्ध्वप्रदेशे मंडलो मंडलाकारभ्रमणं तेने कृतः अत्रोत्प्रेक्ष्यते अदसीयं दमयंतीसंबंधिनं सुखविधुं सुखचंद्रं सेवितुं परिवेष्टितुं लंबमानः चंद्रं परित्यज्य
अधः प्रदेशमागतः शशिपरिधिरिव चंद्रपरिवेष इव एतेन चंद्रापेक्षया दमयंतीसुखस्य मनोज्ञत्वं सूचितं परिवेषस्तु परिधिरिति विंबोरुत्री मंडलं त्रिष्विति चा-
मरः १०८ ६ ६ ६ ६ ६ ६ ६ ६

सर्ग २

मयंत्यां शच्या अप्याधिक्यबुद्धिमाह अनुभवतीति विपिनभुवि उपवनभूमौ सखीभिः सार्धं सह आरब्धा खेला क्रीडा यया ता दृशीं भैमीं दमयंतीं प्रेक्ष्य ह
पक्षिणो हंसस्य इति एवंप्रकारा मतिर्बुद्धिरुदयासीत् उदिताबभूवइति किमित्याह सा प्रसिद्धा शची इंद्राणी घृताचीसुरवाभिर्घृताचीप्रभृतिभिरप्सरोभिः
सहचरीभिः सखीभिः सह इत्थमनेन प्रकारेण दमयंती यथा तथेत्यर्थः उच्चैरतिशयं यथा स्यात्तथा नंदनानंदं नंदननामकोपवनविहारजनितहर्षेन अनुभव
ति नतीपायमधिकेत्यर्थः अत्र दमयंत्यास्तदुपवनस्यत त्सखीनांच क्रमात् शचीनंदनघृताच्यादिभ्य आधिक्यरूपो व्यतिरेकः केचित्तु शचीयं नंदनानंदं नअ

अनुभवतिशचीत्थंसाघृताचीसुरवाभिर्नसहसहचरीभिर्नंदनानंदमुच्चैः इतिमतिरुदयासीत्पक्षि
णः प्रेक्ष्य भैमींविपिनभुविसखीभिः सार्धमारब्धखेलाम् १०९ श्रीहर्षंकविराजराजिमुकुटालं
कारहीरः सुतंश्रीहीरः सुषुवेजितेंद्रियचयंमामल्लदेवीचयं द्वैतीयीकतयामितोयमगमत्तस्य प्रबं
धेमहाकाव्येचारुणिनैषधीयचरिते सर्गोनिसर्गोज्ज्वलः ११० ॐ ॐ

नुभवतितु अपिअनुभवत्येवेति वितर्कपरतया व्याचक्षते प्रेक्ष्येति एककर्तृकत्वाभावात् क्त्वाप्रत्ययानुपपत्तौ स्थितस्येत्यध्याहार्यं १०९ श्रीहर्षमिति त
स्य प्रबंधे द्वैतीयीकतया द्वितीयतयामितोगणितो निसर्गोज्ज्वलः स्वभावेनोज्ज्वलोऽयं सर्गोगमत् समाप्तः अन्यत्सर्वं पूर्ववत् ११० इतिश्रीप्रे
मचंद्रन्यायरत्नविरचितायां नैषधटीकायामन्वयबोधिका समाख्यायां द्वितीयसर्गः समाप्तः २ ॐ ॐ ॐ ॐ २३
हें पुस्तक मुंबईंत काशिनाथवासुदेवखांडेकर याणींवासु॰ नारा॰ डोंगरेयांचेसत्स्वक्काछा॰ छाशके १७९४ अंगिरानामसंवत्सरे माहे चैत्र वद्य ५ रविवासरेसः

[OrderDescription]
,CREATED=23.01.20 10:36
,TRANSFERRED=2020/01/23 at 10:46:35
,PAGES=45
,TYPE=STD
,NAME=S0002629
,Book Name=M-2326-NAISHDHIYCHARITE MAHAKALE
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF

FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF

FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF